वि.सं.-२०७२
वर्ष-४
अङ्क-२

# श्री नि:श्रेयसम्

## षाण्मासिक-पत्रम्

८

श्रेयोभूता शब्दसिद्धि:, पदसिद्धिश्च श्रेयसे ।
वच:सिद्धिस्ततो नित्यं, नि:श्रेयसपदप्रदा ।।

सम्पादक:
मुनिश्रीसम्यग्दर्शनविजयगणि:

वि.सं.-२०७२
वर्ष-४
अङ्क-२

# श्री निःश्रेयसम्

## षाणमासिक-पत्रम्

८

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे ।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा ।।

श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
हिराजैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409



सम्पादकः
मुनिश्रीसम्यग्दर्शनविजयगणिवरः

।। णमोत्थुणं समणस्स भगवओ महावीरस्स ।।
।। ॐ ह्रीँ श्री शंखेश्वरपार्श्वनाथाय नमः ।।
।। पू.आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरिसद्गुरुभ्यो नमः ।।
।।पू.मुक्तिचन्द्र-महोदय-ललितशेखर-जयकुञ्जर-मुक्तिप्रभ-हेमभूषणसूरीभ्यो नमः।।


**श्रीनिःश्रेयसम् (षाण्मासिक-पत्रम्-७)**
**वर्ष : ४ अङ्क = २**

**निमित्तम् :**
जैनशासनज्योतिर्धर पू.आ.श्रीविजय**रामचन्द्र**सूरीश्वराणां दीक्षाशताब्दीचर्ष-वि.सं.२०६९

**आशीर्वाद :**
सुविशालगच्छनायक पू.आ.श्री विजय**पुण्यपाल**सूरीश्वरा:
प्रवचनप्रभावक पू.आ.श्री विजय**मुक्तिप्रभ**सूरीश्वरा:
वात्सल्यवारिधि पू.पं.श्री **वज्रसेन**विजयगणिवरा:

**प्रेरणा :**
प्रसिद्धप्रवचनकार पू.आ.श्री विजय**श्रेयांसप्रभ**सूरीश्वरा:
प्रवचनकुशल पू.आ.श्री विजय**हेमप्रभ**सूरीश्वरा:

**सम्पादनम् :**
पूज्यमुनिप्रवरश्री**सम्यग्दर्शन**विजयगणिवर:

**संशोधनम् :**
पूज्य साध्वीजीश्री **प्रशमनिधिश्री**:
पं.श्री **अमृतभाई** पटेल:

**प्रकाशनप्रतिष्ठानम् :**
**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्**
ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,
त्रिशला फ्लेट के सामने, भठ्ठा, पालडी, अहमदाबाद फोन : (ओ) २६६० ५८६४

**प्रकाशनम् :**
वैक्रमीय २०७२, आषाढ कृष्णा चतुर्दशी,
सोमवार, दि. १-८-२०१६

**प्रतय:** ७५० **मूल्यम् :** २००


---


**आभारः....अनुग्रहः....अनुमोदनम्....**

प्रसिद्धप्रवचनकारपूज्यपादाचार्यप्रवरश्रीमद्विजय**श्रेयांसप्रभसूरी**श्वराणामुपकारस्मृत्यर्थम्
वर्षिल अशोक छेडाया आत्मश्रेयार्थञ्च अशोक भवानजीभाई छेडा परिवारेण
अस्मिन् ग्रन्थे द्रव्यव्ययेन सुकृतसञ्चय: कृतस्तमनुमोदयति...
**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनस्य**
**सञ्चालकगणः**

# ।। अध्यात्मसौन्दर्यं परमोच्चम् ।।

सौन्दर्यमनेकविधं देश-नगर-ग्राम-क्रीडोद्यान-पुष्प-फल-मानवाऽध्यात्मादिविषयकम्।

सौन्दर्यं नाम सुन्दरस्य भावः। सुन्दरत्वं तु रम्यत्वं, सुष्ठुत्वं वा। बहुविधदर्शनीयस्थलादिमत्वं **देशसौन्दर्यम्,** षड्ऋतुप्रफुल्ल-पुष्पफलादिसमृद्धिमत्त्वं-**क्रीडोद्यानसौन्दर्यम्,** मनोहारिवर्णसौरभादिमत्वं **पुष्पसौन्दर्यम्,** स्वादुरसवर्णादिमत्वं **फलसौन्दर्यम्,** दयाऽदैन्यदानादिगुणवत्वं **मानवसौन्दर्यम्** निखिलसौन्दर्येषु **अध्यात्मसौन्दर्यं** परमप्रशस्यं-तेन परमोच्चम्।

**अध्यात्मं** नाम किम्? आत्मनि इति अध्यात्मम्। स्वभावे रममाण आत्मा एव अध्यात्मम्। यदाऽऽत्मा मैत्री-प्रमोद-कारुण्य-माध्यस्थ्यभावनाप्राबल्येन विमलीभवति। तदा स्वस्मिन् अध्यात्मं प्रकटीभवति।

तत्र **मैत्री** = सर्वजीवानामात्मकल्याणभावना।

**प्रमोदः** = गुणाधिकं गुणांशेनाऽपि गुणवन्तं वा दृष्ट्वा गुणानुरागेण हर्षप्रकर्षः।

**कारुण्यम्** = बाह्यान्तरदुःखै दुःखिजनं दृष्ट्वा दयाभावः। तस्य दुःखदूरीकरणभावना।

**माध्यस्थ्यम्**= दुर्विनीतं दुर्विनयं वा दृष्ट्वा, अहितमार्गे प्रवृत्तं तं जनं हितमार्गे प्रवर्तयितुं प्रयासश्चेद् विफलीभवेत् तदापि मनः कालुष्यं निवार्य तत्रोपेक्षाभावः।

यदुक्तम् - **मैत्रीभावना** - शिवमस्तु सर्वजगतः।
**प्रमोदभावना** - परहितनिरता भवन्तु भूतगणाः।
**कारुण्यभावना** - दोषाः प्रयान्तु नाशम्।
**माध्यस्थ्यभावना** - सर्वत्र सुखी भवतु लोकः ।।१।।

तेन मैत्र्यादिभावनात्मकस्वभावे रमणतैवाऽध्यात्मसौन्दर्यम्।

एवं यदि अध्यात्मसौन्दर्यलिप्सा तर्हि मैत्र्यादिभावनाभावितचेतोवृत्तिरेव कर्तव्या। यतोऽध्यात्मसौन्दर्यलाभे सर्वसमृद्धिसिद्धिरपि करतलगता भवति, यावन्निर्वृत्तिरपि स्वयंवरा समायाति, तेनाध्यात्मसौन्दर्यप्राप्त्यर्थमेवैतद् **श्रीनिःश्रेयस**पत्रं समारब्धं, यस्य वाचनचिन्तनमननादिना वाचकविद्वद्गणाः मैत्र्यादिभावनाभावितमनोभिरध्यात्मसौन्दर्यं सुलभं कुरुत।

श्रीनिःश्रेयसमपि हस्तसात् कुरुत।

इति आशासे...

- परमश्रद्धेयगुरुदेवश्रीमद्विजयश्रेयांसप्रभसूरीश्वर-
चरणसेवाहेवाकी मुनिसम्यग्दर्शनविजयगणिः

# क्रमनिर्देशः


| विषयः | लेखकादयः | पृष्ठम् |
|---|---|---|
| प्रतिघोषः | | १ |
| **खण्ड-१ : प्राचीनकृतयः** | | |
| श्री अभयतिलकगणिविहिते द्वे स्तोत्रे | मुनिश्री हेमरतिविजयः | ३ |
| कल्याणमन्दिरस्तोत्रम् | अमृत पटेलः | ६ |
| श्री पार्श्वनाथ जिन स्तवनाऽनुवादः | साध्वीजीश्री विरागदर्शनाश्रीः | २० |
| **खण्ड-२ : यशोप्रज्ञादर्शनम्** | | |
| परमज्योतिः पञ्चविंशतिका | आचार्यश्री विजयकल्याणबोधिसूरिः | २३ |
| वृत्तं यशोविजयवाचकपुङ्गवानाम् | मुनिश्री सम्यग्दर्शनविजयगणिः | २४ |
| यशोगुर्जरस्तवनानुवादः | मुनिश्री आत्मदर्शनविजयः | २७ |
| श्रीमद्यशोविजयस्य किं कर्तृत्वम् | साध्वीजीश्री मुक्तिपूर्णाश्रीः | २९ |
| महोपाध्यायश्रीयशोविजयगणि कृताःप्रकटाप्रकटकृतयः | साध्वीजीश्री विरागदर्शनाश्रीः | ३३ |
| श्री महोपाध्यायजीकृत-द्वितीयस्तवनचतुर्विंशी | साध्वीजीश्री प्रशमनिधिश्रीः | ३५ |
| **खण्ड-३ : दीक्षाशताब्दीभावाञ्जलिः** | | |
| श्री प्रेमशतकम् | आचार्यश्री विजयमुक्तिप्रभसूरिः | ३८ |
| रामचन्द्रं गुरुराजं शरणं तं श्रये | आचार्यश्रीविजयतपोरत्नसूरिः | ४६ |
| श्रीरामचन्द्रीयमहाकाव्यम् | पंन्यासश्री मोक्षरतिविजयगणिः | ४८ |
| सूरिरामवचनामृतम् | मुनिश्री आत्मदर्शनविजयः | ५८ |
| श्री सूरिरामचन्द्रवचनामृतम्... | साध्वीजीश्री श्रेयपूर्णाश्रीः | ६० |
| **खण्ड-४ : अर्वाचीनकृतयः** | | |
| कन्याप्रदाने सावधानः | आचार्यश्री विजयकल्याणबोधिसूरिः | ६४ |
| आगमस्यामृतम् | आचार्यश्री विजयकल्याणबोधिसूरिः | ६५ |
| चारित्रसप्तविंशिका-७ | मुनिश्री सम्यग्दर्शनविजयगणिः | ६६ |
| शुद्धिः | श्रीकमलः | ७० |
| बहुरत्ना वसुन्धरा | मुनिश्री दर्शनरक्षितविजयः | ७२ |
| स सज्जनः | मुनिश्री प्रशमरक्षितविजयः | ७३ |
| श्रीऋषभजिनस्तुत्यष्टकम् | मुनिश्री दिव्यदर्शनविजयः | ७५ |
| चक्षुष्मन्तो भवामः | साध्वीजीश्री धन्यरेखाश्रीः | ७६ |
| चतुर्विंशतिजिन चैत्यवन्दनानि... | साध्वीजीश्री विरागदर्शनाश्रीः | ७८ |
| श्रेयस्करीजिनस्तुतिचतुर्विंशी | साध्वीजीश्री प्रशमनिधिश्रीः | ८१ |
| काव्यशास्त्र विनोदेन | साध्वीजीश्री प्रशमनिधिश्रीः | ८६ |
| काव्यशास्त्र विनोदेन | साध्वीजीश्री धन्यरेखाश्रीः | ८७ |
| आज्ञाराद्धा विराद्धा च शिवाय च भवाय च | साध्वीजीश्री धन्यपुण्याश्रीः | ८८ |
| ऐन्द्रवृन्दैर्वन्दितः श्रमणधर्मः | साध्वीजीश्री कुलरत्नाश्रीः | ८९ |
| स्वामिन्! गतोऽस्मि शरणं चरणं द्वयं ते | श्री चन्द्रजैनः | ९१ |
| जैनदर्शने प्रामाण्यविमर्शः | आचार्यः गोकुलचन्द्रः जैनः | ९३ |
| ईश्वरस्य व्यापकता | डॉ.आचार्यरामकिशोर मिश्रः | ९८ |
| "आचार्यहेमेचंद्र" पुस्तिका | प्रा.डॉ.मधुसूदन म. व्यासः | १०० |

# प्रतिघोषः

ता. २६-२-२०१६
कलिकुंडतीर्थ

प्रात:स्मरणीय श्रीमद् विजय
प्रेम-भुवनभानु-जयघोषसूरीश्वरजी आज्ञानुकारी
पं.भुवनसुंदर विजय
पं.गुणसुंदरविजय तरफथी...

शमदमादिगुणगणवंत श्री नि:श्रेयसम्ना सम्पादक विद्वद्वर्य मुनिराजश्री सम्यग्दर्शनविजय गणिवर म.सा.नी पावन सेवामां...अनुवंदना...सुखशाता पृच्छा.

**श्री नि:श्रेयसम्**...नियमित मळे छे. वांचवुं खुब गमे छे, आवुं सुंदर संपादन बदल अनुमोदना... आनंद...अभिनंदन...

* * *

डॉ. श्री चन्द्र जैन
२००-एम. क्रीष्णा नगर,
रेवाळी-१२३४०१, हरीयाणा.
ता.२१-०३-२०१६

प्राप्नोमि नि:श्रेयसं पत्रं सततं ज्ञानवर्धकम्।
त्वं सम्पादक! विज्ञोऽसि, तव प्रयासो हि मूल्यवान्।

सम्पादक महोदय!

कोटिश: धन्यवादा: षाण्मासिकपत्रम् **'नि:श्रेयसम्'** प्रेषणार्थम्। एतदवलोक्य महतीं प्रसन्नतामनुभवामि। पत्रस्यास्य स्वस्थप्रकाशनं, स्तरीया सामग्री, सुसज्जाश्चादय: प्रशंसनीया:।

सम्पादकानां विश्रामपरिश्रम: महत्त्वपूर्ण:।

सधन्यवाद:।
श्रीचन्द्रजैन:।

* * *

वसंत परिखः
३, देनाबेंक सोसायटी,
अमरेली-३६५ ६०१

परम श्रद्धेया: मुनिवर्या:
सादरं नौमि

**श्री नि:श्रेयसस्य** पत्रस्य सप्तममङ्कं प्राप्य प्रसन्नतरोऽस्मि। संस्कृतभाषाऽनेन पत्रेण गरिमाणं प्राप्ता। अपि तु संस्कृतभाषामाध्यमेन भारतीयदर्शनस्य उत्कृष्टं मधु अस्मिन् अङ्के प्रवहति।

नि:श्रेयसं सर्वदा सधार्मिकाणां नि:श्रेयसे भवतु।

सधन्यवादै:-

विनीत: - वसंत परीख

* * *

ता.७-४-१६
वापी

देव-गुरु भक्तिकारक श्री श्रुतज्ञान भवनना सर्वे संचालक गण योग्य-धर्मलाभ श्री **नि:श्रेयसम्**नो ७मो अंक मळ्यो। हैयुं आनंद विभोर बनी गयुं. आजकाल आर्ट पेपर उपर छपाववानो शोख वधी गयो छे। परंतु आर्ट पेपरने जरापण भेज लागे एटले आखोय ग्रंथ नकामो। आवा तो मारी पासे दोढसो जेटला ग्रंथो मोंघा भावना परठवी देवा पड्या छे, आवे त्यारे ज भेजवाळा थइ ने आवे। तमे चालु कागळमां छापवानुं राख्युं छे, ते खुब ज सारुं छे।

- लि. आ. रत्नभूषणसूरि

# खण्ड-१

# प्राचीन कृतय:

भो: भो: सहृदया:!

विद्वद्वरेण्या: सज्जनशेखरा:!

सादरम्...सस्नेहम्...सन्निमन्त्रणं

परमर्षिप्रथितानां महर्षिग्रथितानांप्राचीनकृतीनां पठन-पाठनाय **'पुरुष-विश्वासे वचन-विश्वास** इति युक्तिं संस्मृत्य परममहर्षीन् प्रति सद्भाववन्तस् तत्रभवन्त:। तद्वचनेऽपि समुद्यमवन्तो भवत।

यत: प्राचीनमहात्मान: प्रशमरतिसागरावगाढा: संयमसुन्दरीसंगमोत्सुका:, सौम्यवदनकमला: सौभाग्यशीलसौरभसमाकृष्टसज्जन शालीमुखै: सततं संसेविता:।

ये सम्यग्दर्शनस्थैर्येण शैलेशमपि समवधीरयन्त:, आगमवचने प्रावीण्यमाबिभ्राणा: प्रतिज्ञातप्रव्रज्यापथे प्रवरपथिकायमाना:, रत्नत्रय्याऽपि षड्जीवनिकायषट्खण्डं पालयन्ति-अतश्चक्रवर्त्तिचक्रमपि तिरस्कुर्वन्ति-ते केषां श्रद्धाभाजनं न भवेयु:? तत **श्रीनि:श्रेयसस्य** प्रथमखण्डेऽस्मिन् सुगृहीतनामधेयैस्तैरेव ग्रथितग्रन्था: संस्थापिता अस्माभि:।

तज्ग्रन्थरसवतीमास्वाद्याऽस्मदात्मा, वैषयिकविभावे विंमुखीभूय, सद्गुणस्वभावे संमुखीभूय सपदि परमपदं प्राप्नुयात्।

इति शम्

**'परम:'**

# श्री अभयतिलकगणिविहिते द्वे स्तोत्रे

- *संपादक-पू.आ.श्री हेमप्रभसूरिशिष्य-
-मुनिश्री हेमरतिविजयः

## श्री ऋषभजिनस्तवः

(खरतरगच्छीय जिनेश्वरसूरिशिष्य-श्री अभयतिलकेन इमे द्वे लघू अपि रसास्वाद्ये स्तोत्रे व्यरचि-एकं शत्रुञ्जयमण्डनऋषभदेवस्तवः, द्वितीयं च रैवताचलतिलकश्रीनेमिनाथ स्तवः। इमे स्तोत्रे 'लालभाई - दलपतभाई' भारतीय विद्यामन्दिर अमदावादसत्कहस्तप्रतग्रन्थालयस्य-भेट सूची-४३३१७-क्रमाङ्कितप्रतस्य १०-११ पत्रयोर्लिखिते स्तः।
कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यप्रणीतद्व्याश्रयमहाकाव्यस्य संस्कृतविभागस्याऽमुनाभय-तिलकगणिना-वि.१३२०तमे वत्सरे वृत्तिर्विहितास्ति। सूरिसम्राट्रामचन्द्रसूरिवरसाम्राज्यवर्तिमुनेरयं प्रथमः संपादनप्रयासः, तथापि प्रशस्यः-अमृत पटेलः।)

### शत्रुञ्जयगिरिमण्डनश्रीऋषभजिनस्तवः।

प्रह्वीभवत्त्रिदशनाथकिरीटकोटि-रत्नप्रभाजलभराप्लुतपादकूर्मम् ।
शत्रुञ्जये क्षितिधरे विहिताधिवासं, बद्धाञ्जलिः प्रथमतीर्थपतिं स्तवीमि ।।१।।

धन्या इमेऽपि भुवने भुवनाधिनाथ!, येषां मनोविषयमात्रमलङ्करोसि ।
स्वप्नेऽपि पश्यति कदाचन मन्दभाग्यो, रत्नोच्चयेन निचितं निजमन्दिरं किम्? ।।२।।

येषां पुन र्मनसि तीर्थपते! ऽसि साक्षात्, तेषामपूरि सकलापि समीहितालिः।
प्रत्यक्षतामुपगतोऽत्र महानिधान-कुम्भः प्रसाधयति कां न हि साध्यसिद्धिम् ।।३।।

---

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्ती ।

दिष्ट्येक्षिते त्वयि जिना! ऽप्रतिरूपरूपे, रूपामृताञ्जनवरेण विलोचने मे।
अद्याञ्जिते ध्रुवमहो कथमन्यथाऽश्रु-बिन्दूनि मे टबटबेति विमुञ्चतः श्राक् ।।४।।

क्वाऽहं नृकीटकणः क्व च सिद्धकोटि-क्षेत्रं पवित्रमतुलं विमलाद्रिरेषः।
क्वाहं जिनेषु वृषभो वृषभः क्व चैष, वीक्षोत्सवः कथमहो सुकृतै र्व्यजृम्भि ।।५।।

हे उत्तमाङ्ग! वृषभेश्वरपादपद्मौ, स्पृष्ट्वा मुहुर् वितनु नाम निजं यथार्थम्।
रे रे दृशौ! रुगरुगापिबतं जिनार्चां, नासे! वपु:परिमलं स्वविभोः प्रतीच्छ ।।६।।

स्पर्धाज् जिनस्य श्रुणुतं श्रवणे गुणान् हे!, नेतुः स्तवैः सह रसाद् रसने! रमस्व।
रे नृत्य नृत्य हृदय! प्रविमुच्य लज्जां, प्रस्ताव एष हि पुनः सुलभो यतो न ।।७।।

श्री पुण्डरीकगणभृन्मुख सिद्ध कोटा-कोटी पवित्रविमलार्द्रिशिरोनिविष्टः।
त्वं नन्द नन्द जय जीव युगादि देव!, देयाः स्वदर्शनमहो **अभयं** सदा मे ।।८।।

* * *

## रैवताचलतिलकनेमिजिनस्तवः

विमलरैवतकाचलशेखरः सरभसप्रणतत्रिदशेश्वरः।
गवल-कज्जलकोमलदीधितिर्-जयति नेमिजिनस् त्रिजगत्पतिः ।।१।।

मोक्षाध्वगाय इह रैवतकेऽधिरुह्य, नेमे! जगत्सुरतरो! तव पादमूले।
प्रीत्या वसन्ति हि भवग्रहणप्रयाणैर्-द्वित्रैरिमे शिवपुरीं नियतं व्रजन्ति ।।२।।

जिनपते! त्वयि नेत्रपथं गते, विकसिते सुकृतैः सह मे दृशौ।
हृदयमुच्छ्वसितं वपुषा समं, दुरितमाशुगतं तु रसातलम् ।।३।।

भाद्राम्बुवाहनिभदेहरुचे! कटाक्ष-धाराभरेण भवता मयि वर्षतेश! ।
उत्पाटितः खलु तथा चिरकालपङ्को, रन्तुं समीप्सति यथाऽपि हि मुक्तिकन्या ।।४।।

मम गृहे फलितोऽद्य सुरद्रुमो, मम गृहे सुरधेनुररंसत ।
मम गृहे नवशेवधयोऽचिरा-दुदघटन्त विभो! त्वयि वीक्षिते ।।५।।

पूर्वार्जितानि सुकृतानि फलोन्मुखानि, जातानि मेऽद्य सुदशोज्जघटे ममाऽद्य ।
श्रीनेमिनाथ! जिन! लोचनगोचरत्वं, यत् त्वं गतो बत महोदय एव मूर्त्तः ।।६।।

तव विभो! भृतकस् तव सेवको-ऽस्मि तव कर्मकरस् तव किङ्करः ।
असि विभो! धनिकोभ्यसि नायको-मम भवान् यदधीश! निकामये ।।७।।

श्रीउज्जयन्तशिखरे भगवन्नुदूढ-दीक्षर्धिकेवलरमाशिवकेलिकान्त!
वर्धस्व नन्द विजयीभव नेमिनाथ!, मन्यस्व **माम**भय**ता**तिलक! स्ववंठम् ।।८।।

# सौभाग्यमञ्जरीवृत्तिसमेतम्।।
# कल्याणमन्दिरस्तोत्रम्

- *अमृत पटेलः

(श्री प्रभाचन्द्रसूरिप्रणीतप्रभावकचरित्रनिर्दिष्टेन वृद्धवादिशिष्येन कुमुदचन्द्रेणापरनाम्ना, दिवाकरोपाधिमता श्रीसिद्धसेनसूरिणा निर्मितं कल्याणमन्दिरम् इत्याद्यपदात् **'कल्याणमन्दिर'** इति ख्यातिमाप्तमिदं त्रिसन्ध्यस्मरणीयं स्तोत्रं श्री पार्श्वनाथजिनेन्द्रस्य स्तुतिपरम् विद्यते।

स्तोत्रस्यास्योपरि [१]एकादशमिताः टीकाः श्रीमता हीरालालरसिकलालमहाभागेन समुल्लिखिताः-तत्रेयं प्रसिद्धिमानीयमाना 'सौभाग्यमञ्जरीवृत्तिः [२]प्रायो' रत्नचन्द्रगणिविरचिता संभवति-यतोऽस्माकं पार्श्वे उपलब्ध-प्रतौ प्रशस्तिर्नास्ति केवलं [३]पुष्पिकैवास्ति-, सम्पादनमिदमस्माभिर्द्वेप्रती प्राप्य कृतम्-

१. पाटणस्थितहेमचन्द्राचार्यज्ञानभण्डारसत्का-१४३२३ क्रमाङ्किता-प्रति. ब्रह्मसरनगरे सं.१८७० तमे विक्रमार्कवर्षे बृहत्खरतरगच्छीयजिनभद्रसूरिशाखायां पद्महंसमुनिना लिखिता।

२. द्वितीया प्रतिः-'श्री कैलाशसागरसूरिज्ञानमन्दिर, कोबा-गूजरात' भण्डारस्य १८६२७ क्रमाङ्किता, नास्याः प्रतेः पुष्पिका-पाठोस्या अस्माभिः 'क' संज्ञयाऽटीप्पितः-अमृत पटेलः)

भास्वद्रत्नगभस्तिभिस्त्रिजगतीमुद्योतयन्तः फणाः,<br>
[१]शीर्षे यस्यऽसम स्थिति-धृति भृतो राजन्ति राजत्कलाः इति प्रतिपाठः।<br>
सत्वानां नवतत्त्वदर्शनविधौ, चारुप्रदीपोपमाः<br>
[२]श्रीपार्श्वः प्रणतोत्तमस् तनुभृतां, दद्यान्मनोवाञ्छितम्।।

तस्य देवाधिदेवस्य, प्रणम्य पदपङ्कजम्।<br>
कल्याणमन्दिरस्तोत्र-वृत्तिः प्रारभ्यते मुदा ।।२।।

* * *

* व्याकरण काव्य-छन्दादिनामध्यापकः

१. शीर्षे यस्य सुस्थितिमुन्नतिभृतो [?] इति प्रतिपाठः।

२. श्रीपार्श्वस्यनोत्तमतनुभृतां दद्यान्मनोवाञ्छितम् इति प्रतिपाठः।

❀ **कल्याण-मन्दिरमुदारमवद्यभेदि-**
**भीताभयप्रदमनिन्दितमङ्घ्रिपद्मम्।**
**संसारसागरनिमज्जदशेष जन्तु-**
**पोतायमानमभिनम्य जिनेश्वरस्य** ॥१॥

❀ **यस्य स्वयं सुरगुरुर्गरिमाम्बु-राशेः,**
**स्तोत्रं सुविस्तृतमतिर्न विभुर्विधातुम्।**
**तीर्थेश्वरस्य कमठस्मयधूमकेतोस्-**
**तस्याहमेष किल संस्तवनं करिष्ये** ॥२॥

**(सौ.मं.-) किल** इति सत्ये। **एष अहं** श्री सिद्धसेनदिवाकरसूरिः, तस्य भगवतः श्रीपार्श्वनाथस्य **संस्तवनं** स्तोत्रं **करिष्ये** विधास्यामि। किं लक्षणस्य तस्य? -तीर्थेश्वरस्य तीर्थं चतुर्विधसङ्घः प्रथमगणधरो वा, तेषामीश्वरः स्वामी, तस्य ''तित्थं चउव्विहसंघो [1]पठमगणहरो व (            ) त्ति। पुनः किं लक्षणस्य तस्य? - **कमठस्मयधूमकेतोः**। कमठस्य स्मयः कमठस्मयः। कमठस्मयस्य धूमकेतुः कमठस्मयधूमकेतुस्तस्य कमठस्मय-धूमकेतोः। कमठाहङ्कारदहने धूमकेतुः वैश्वानरः। अथवा धूमकेतुर्ग्रह अष्टोत्तरशतकेतूनां मध्ये एको धूमकेतुर्वर्तते। सोऽपि दहनमेकः। अतः एव कमठस्मयधूमकेतोः। **यस्य** परमेश्वरस्य **स्तोत्रं विधातुं** कर्तुं, स्वयं आत्मना, **सुरगुरुर्बृहस्पतिर्न विभुः** न समर्थः। तर्हि सुरगुरुर्मन्दबुद्धिर्भविष्यति। तर्हि किंलक्षणः सुरगुरुः? - **सुविस्तृतमतिः** 'सुविस्तृता' विस्तीर्णा 'मतिर् यस्य स सुविस्तृतमतिः। एतावता गरिष्ठबुद्धिः भविष्यति। किं लक्षणस्य?- **गरिमाम्बुराशेः**-गुरोर्भावो गरिमा, ''पृथ्वादिभ्यः इमन् वां'' (सि.हे.७/१/५८ ) प्रत्ययः। गरिम्नः अम्बुराशिः गरिमाम्बुराशिः, तस्य गरिमाम्बुराशेः [गौरव]समुद्रस्यः । किं कृत्वा? - जिनेश्वरस्य **तीर्थेश्वरस्य** तीर्थनाथस्य श्रीपार्श्वनाथस्य, **अंह्रिपद्मं** चरणकमलं **अभिनम्य**। नवीनकाव्यनिर्माणे देवादीनां नमस्कारो युक्तः। अभिनवकार्यारम्भे अभीष्टदेवतादीनां स्मरणं क्रियते, किमर्थम्? प्रत्यूहापोहाय विघ्नविनाशाय। किंलक्षणं अंह्रिपद्मं? - **कल्याणमन्दिरम्** कल्याणानां स्थानम्। पुनः किं लक्षणं अंह्रिपद्मम्? - **उदारं** गरिष्ठं, उदारं मनोवाञ्छितसुखदातृ। पुनः किंविशिष्टं अंह्रिपद्मम्? - **अवद्यभेदि** अवद्यं पापं कर्म्म भिनत्तीत्येवंशीलं 'अवद्यभेदि' पापविनाशकम्। पुनः किंलक्षणम् अंह्रिपद्मम्? - **भीताभयप्रदम्** भीतानां प्राणिनां अभयं

१. पढमो च्चिय गणहरोहवा तित्थं-इति पाठोवि वीर स्तव प्रकीर्णके रुपतमगाथाम्।

प्रददातीति भीताभयप्रदम्, संसारभीतानां प्राणिनां अभयदानदायकम्। इह भयाः सप्त। भयशब्दो उभयलिङ्गवाचीत्येके। ते सप्त भयाः। [1] इहलोकभयं [2] परलोकभयं [3] [1]आदानभयं [4] अकस्माद्भयं [5] [2]आजीविकाभयं [6] मरणभयं [7] [3]अश्लाघा भयं [8] एते सप्त भयाः। परमेश्वरपादपूजनेन सप्त भयानि नश्यन्ति। पुनरपि किंलक्षणं अंह्रिपद्मम्? [-] अनिन्दितं स्तुत्यमित्यर्थः। पुनः किंविशिष्टं अंह्रिपद्मम्?-**संसारसागर-निमज्जदशेषजन्तुपोतायमानम्** - संसार एव सागरः संसारसागरः, तस्मिन् संसारसागरे निमञ्जन्तो ब्रुडन्तो ये अशेषाः समस्ता जन्तवः, तेषां प्रवहणसमानं, पोतवद् आचरति इति ( ) पोतायमानं संसारसागरब्रुडनसमये [२]जन्तूनां बेडातुल्यं बेडासादृश्यम् (सदृशम्)। एतानि सर्वाण्यपि भगवतश्चरणकमलविशेषणानि ज्ञातव्यानि ।।२।।युग्मार्थः।

❁ **सामान्यतोऽपि तव वर्णयितुं स्वरुप-**
**मस्मादृशाः कथमधीश! भवन्त्यधीशाः।**
**धृष्टोऽपि कौशिकशिशुर्-यदि वा दिवान्धो-**
**रुपं प्ररुपयति किं किल घर्म-रश्मेः? ।।३।।**

**(सौ.मं.)** हे **अधीश**! हे प्रभो! **अस्मादृशाः** प्राणिनः **सामान्यतोऽपि** सामान्यमात्रतोऽपि **तव स्वरुपं** तव माहात्म्यं वर्णयितुं **कथमधीशाः भवन्ति** कथं समर्था भवन्ति? स्वभावतोऽपि परमेश्वरस्वरूपवर्णने अस्मादृशः प्राणिनः न समर्थाः। अमुमेवार्थं कविर्दृष्टान्तेन दृढीकरोति-**धृष्टोऽपि कौशिकशिशुर्यदि वा दिवान्धो रूपं प्ररूपयति किं किल घर्मरश्मेः।** किलेति सम्भावनायाम्। यदि कौशिकशिशुर्घूकबालः घर्मरश्मेः सूर्यस्य स्वरूपं किं प्ररूपयति विलोकयति? अपि तु न प्ररूपयति न विलोकयति। किंलक्षणः कौशिकशिशुः? -धृष्टोऽपि, पुनः किंलक्षणः? कौशिकशिशुः? दिवान्धः। यदुक्तम्-

**न पश्यति दिवा घूकः, काको नक्तं न पश्यति।**
**कामार्त्तः पुरुषो लोके, दिवा-नक्तं न पश्यति** ।।१।। इति शास्त्रवचनात्,

दिवा घूको न पश्यति। अत्र कौशिकशिशुरिति किम्? कौशिक एव कथं न? सत्यम्, शिशोः दृष्टिरतीव निर्मला वृद्धस्य दृष्टिस्तादृशी निर्मला न भवति। अतः कारणात् कौशिकशिशुरिति, सत्यम् ।।३।।

---

१. कीर्तिभयं (३) जीवभयं (५) अपकीर्तिभयं (७) प्रतौ केनचित् टिप्पणकीकृतानि।
२. ब्रुडत्समस्तजन्तु-बेडातुल्यं बेडासदृशम् -क।

❁ **मोहक्षयादनुभवन्नपि नाथ! मर्त्यो,**
**नूनं गुणान् गणयितुं न तव क्षमेत।**
**कल्पान्तवान्तपयसः प्रकटोऽपि यस्मान्-**
**मीयेत केन जलधेर्ननु रत्नराशिः?** ।।४।।

**(सौ.मं.)** हे **नाथ!** हे स्वामिन्! **नूनं** निश्चितम्। **मर्त्यो** मनुष्यः। तव **गुणान् गणयितुं** सङ्ख्यां कर्तुं **न क्षमेत** न समर्थो भवेत्। मर्त्यः किं कुर्वन्?- **मोहक्षयात्** मोहपरिहारात्, **अनुभवन्नपि** जानन्नपि। अत्रार्थे दृष्टान्तमाह। **कल्पान्तवातपयसः प्रकटोऽपि यस्मान्मीयेत केन जलधे र्ननु रत्नराशिः।** **ननु** निश्चितम्। यत् **यस्मात्** कारणात् **जलधेः** समुद्रस्य **रत्नराशिः केन मीयेत** केन गण्येत? अपि तु न केनापि, न मीयेत, न गण्येत, तर्हि रत्नराशिः गुप्तो भविष्यति? कथंभूतो रत्नराशिः?- **कल्पान्तवान्तपयसः प्रकटोऽपि**। कल्पान्तकालेन वान्तं, [1]वायुना दूरीकृतं यत् पयः पानीयं, तस्मात् प्रकटोऽपि प्रत्यक्षोऽपि, तथा तेन भगवतो गुणान् गणयितुं न समर्थः अनन्तगुणत्वात् ।।४।।

❁ **अभ्युद्यतोऽस्मि तव नाथ! जडाशयोऽपि,**
**कर्तुं स्तवं लसदसङ्ख्यगुणाकरस्य।**
**बालोऽपि किं न निजबाहुयुगं वितत्य**
**विस्तीर्णतां कथयति स्वधियाऽम्बुराशेः** ।।५।।

**(सौ.मं.)** हे **नाथ!** हे स्वामिन्! अहं **तव स्तवं कर्तुं अभ्युद्यतोऽस्मि** उद्यमपरोऽस्मि। कथंभूतोऽहम्? **-जडाशयोऽपि** जडचित्तोऽपि। कथंभूतस्य तव?- **लसदसङ्ख्यगुणाकरस्य** अनन्तगुणस्थानस्य। अमुमेवार्थं किञ्चिद्दृष्टान्तेन दृढयति। [2]**बालोऽपि किं न निजबाहुयुगं वितत्य विस्तीर्णतां कथयति स्वधियाऽम्बुराशेः।** बालोऽपि लघुरपि स्वधिया, अम्बुराशिः समुद्रः, तस्य विस्तीर्णतां किं न कथयति? अपि तु कथयत्येव। किं कृत्वा? निजबाहुयुगं वितत्य स्वकीयबाहुयुगलं प्रसार्य। मातृ(ता) पितरौ बालकं पृच्छति (तः)। भो पुत्र! समुद्रः कियन्मात्रम्। वलमानो बालः ब्रूते 'बाहू प्रसार्य' हे अम्ब! एतावन्मात्रं समुद्रः। तथाऽहं बालकवत् तव स्तवनं कर्तुं प्रवृत्तोऽस्मीति भावः ।

१. कल्पान्तवायुना दूरी.। २. बालोऽपि = उत्तरार्धम्-क०।

❁ **ये योगिनामपि न यान्ति गुणास्तवेश!**
**वक्तुं कथं भवति तेषु ममाऽवकाशः ।**
**जाता तदेवमसमीक्षितकारितेयं,**
**जल्पन्ति वा निजगिरा ननु पक्षिणोऽपि ।।६।।**

**(सौ.मं.)** हे **ईश**! हे स्वामिन्! **ये तव गुणा योगिनामपि** योगीश्वराणां अपि **वक्तुं** न **यान्ति** (योगिनोऽपि) **वक्तुं** न **समर्थाः** भवन्ति। **तेषु** गुणेषु **ममावकाशः** कथं स्यात्? तान् गुणान् **वक्तुं** अहं कथं समर्थो भवामि? अपि तु न, सत्यमेतत्। [1]जाता **तदेवमसमीक्षितकारितेयम्**। तत् तस्मात् कारणात्। एवममुना प्रकारेण। इयं प्रस्तुतस्तुतिविषया **असमीक्षितकारिता** अविचार्यविधायिता जाता। असमीक्षितं अविचारितं करोतीति असमीक्षितकारी, तस्य भावो असमीक्षितकारिता, अनवकाशेऽपि यत् स्तुतिः क्रियते तत् अविचार्यैव। **जल्पन्ति [2]वा निजगिरा ननु पक्षिणोऽपि।** [3]तत् तस्मात् कारणात्। एवं अमुना (प्रकारेण) जल्पन्ति[3]। यथा पक्षिणः स्वकीया-वाण्या जल्पन्ति, तथा अहमपि श्रीपार्श्वदेवस्य गुणान् किञ्चित् किञ्चित् कथयिष्यामीति भावः।।६।।

❁ **आस्तामचिन्त्यमहिमा जिन! संस्तवस्ते,**
**नामाऽपि पाति भवतो भवतो जगन्ति।**
**तीव्राऽऽतपोपहतपान्थजनान् निदाघे,**
**प्रीणाति पद्मसरसः, सरसोऽनिलोऽपि ।।७।।**

**(सौ.मं.)** हे **जिन**!। जिता रागादयो वैरिणोऽपि येन जिनः, तस्यामन्त्रणं विधीयते- हे जिन! हे वीतराग! **ते** तव **संस्तवः** स्तोत्रं, **आस्तां** दूरे तिष्ठतु। किंलक्षणः संस्तवः? **अचिन्त्यमहिमा** अचिन्त्यो महिमा यस्य स अचिन्त्यमहिमा अचिन्त्यप्रभावः। **नामापि पाति भवतो भवतो जगन्ति**-हे जिन! **भवतः** तव **नामापि**, **भवतः** संसारात्, **जगन्ति** विश्वानि **पाति** रक्षति। भगवतो नाम्नाऽपि संसारसमुद्रस्तीर्यते। स्तोत्रस्य प्रचुरो

१. 'जाता तदेव' इत्युत्तरार्धम्-क० २. 'वा' इति पक्षान्तरे, यथा असमीक्षितकारिता न भवति इति पक्षान्तरे। 'ननु' इति वितर्के-माणिक्यचन्द्र प्रणीतवृत्तेः। ३-३. 'तत्....जल्पन्ति' इति वृत्तिखण्डो नाऽत्र युज्यते इति भाति।

महिमा। अमुमेवार्थं कविर्दृष्टान्तेन दृढयति–[१]**तीव्रातपोपहतपान्थजनान् निदाघे प्रीणाति पद्मसरसः स-रसोऽनिलोऽपि।** पद्मसरः आस्तां दूरे तिष्ठतु। **'पद्मसरसः'** पद्म-सरोवरस्य। **अनिलोऽपि** वायुः, निदाघे उष्णकाले। **तीव्रातपोपहतपान्थजनान्** **'प्रीणाति'** संतोषमुत्पादयति। तीव्राऽऽतपेन उपहताः उच्चाटिताः पान्थजनाः। तीव्राऽऽतपोपहत-पान्थजनाः, तान्-समासोऽयं। किंलक्षणः अनिलः? [२]**"सरसः'** शीतलः। शास्त्रे [३]वायवस्-त्रिविधाः कथिताः-शीतो मन्दः सुरभिश्च ।।७।।

❁ **हृद्वर्तिनि त्वयि विभो! शिथिलीभवन्ति,**
**जन्तोः क्षणेन निबिडा अपि कर्मबन्धाः।**
**सद्यो भुजङ्गममया इव मध्यभाग-**
**मभ्यागते वनशिखण्डिनि चन्दनस्य ।।८।।**

**(सौ.मं.)** हे **विभो**! हे स्वामिन्! **जन्तोः** प्राणिनः । ५ **निव(बि)**[४]**डा अपि कर्मबन्धाः**।–[1]ज्ञानावरणी [2]दर्शनावरणीय [3]वेदनीय [4]मोहनीय [5]आयुकर्म [6]नामकर्म [7]गोत्र [8]अन्तराय–एतान्यष्टौ कर्माणि **क्षणेन** क्षणमात्रेण **शिथिलीभवन्ति**। क्व सति? – **त्वयि** हृद्वर्त्तिनि सति। हृदयमध्यभागमभ्यागते सति, अमुमेवाऽर्थं कविर्दृष्टान्तेन दृढयति–ते जन्तव (तेषांजन्तूनां) कर्मबन्धा के इव?–भुजङ्गममया बन्धा इव चन्दनस्य मध्यभागं वनशिखण्डिनि अभ्यागते प्राप्ते सति भुजङ्गममया बन्धाः सद्यस् तत्कालं क्षणादेव शिथिलीभवन्ति तत्र [६]निपततन्ति। सर्पास्तु चन्दनद्रुमान् वेष्टयित्वा स्थिताः सन्ति। यदा तत्र गत्वा मयूरः शब्दं करोति, तेनैव मयूरशब्देन सर्वेऽपि सर्पा नश्यन्ति। यत्र चन्दनवृक्षास्तत्र भोगिनो वसन्ति। शास्त्रे प्रोक्तमस्ति यतः–

**चन्द्रे लाञ्छनता, हिमं हिमगिरौ, क्षारं जलं सागरे,**
**रुद्धश्चन्दनपादपो, विषधरैः, [६]कार्कश्यमिन्दीवरे।**
**स्त्रीरत्नेषु जरा, कुचेषु पतनं, विद्वत्सु दारिद्र्यता,**
[७]**सर्वं रत्नसमुद्रवेण सहितं, निर्दोषमेकं यशः ।।१।।**

१. 'तीव्रातप' इत्युत्तरार्धम् यथा–क० । २. सह रसेन–जलेन–जलशीकरेण इत्यर्थः – वर्त्तते यः सः, 'रसः स्वेदे जले वीर्ये (हैमानेकार्थ०–४७३)। ३. वायुस्त्रिविधो वर्णितः । ४. प्रतौ 'निवडा' इति पाठः मूलत्वेन गृहीतः ५. त्वयि कस्मिन्निव?–वनशिखण्डिनि इव वनमयूर इव – यथा भुजङ्गममया बन्धाः सर्पबन्धाः सद्यस्तत्कालं शिथिलीभवन्ति – क्व सति वनशिखण्डिनि? वनमयूरे?–चन्दनस्य मध्यभागं अभ्यागते सति इति प्रतौ भिन्नान्वयः। ६.–रम्भोरुहं कण्टकैः। – ७. सर्वं रत्नसमुद्रदोष–पा० सहितं निर्दोष...–क०। 'रत्नमुपद्र' इति पाठः स्यात्, तर्हि साधु।

अत्र कर्मणां उपमानं भुजङ्गाः, वनमयूरोपमानं भगवतः नामोच्चारणम्।।८।।

❁ **मुच्यन्त एव मनुजाः सहसा जिनेन्द्र !,**
**रौद्रैरुपद्रवशतैस्त्वयि वीक्षितेऽपि ।**
**गोस्वामिनि स्फुरिततेजसि दृष्टमात्रे,**
**चौरैरिवाऽऽशु पशवः प्रपलायमानैः ।।९।।**

**(सौ.मं.)** हे **जिनेन्द्र**!। जिनाः समान्यकेवलिनः, तेषामिन्द्रो जिनेन्द्रः, तस्य सम्बोधनं क्रियते-हे जिनेन्द्र! स्वामिन्!। **'मनुजाः'** मनुष्याः **'रौद्रैरुपद्रवशतैः'** क्लेशशतैः सहसा एव शीघ्रेण निश्चयेन मुच्यन्ते। क्व सति? **त्वयि** वीक्षितेऽपि सति दृष्टे सति। अत्रार्थं दृढीकरोति दृष्टान्तः।[1] **गोस्वामिनि स्फुरित तेजसि दृष्टमात्रे, चौरैरिवाशु पशवः प्रपलायमानैः**। उपद्रवशतैः। कैरिव? चौरैरिव। मनुजाः के इव? - पशव इव, यथा चौरैः आशु शीघ्रं पशवो मुच्यन्ते। किंलक्षणैश्चौरैः? - **प्रपलायमानैः** त्रस्यमानैः। क्व सति?-[2]**गोस्वामिनि** गोपाले दृष्टमात्रे सति। यथा गोपाले दृष्टे चौराः पशून् विमुच्य दिशोदिशं प्रयान्ति। अत्र समासः-गवां स्वामी गोपालः-एकोऽर्थः। अथवा गोस्वामी सूर्यः, गावः किरणास्तेषां स्वामी गोस्वामी सूर्यः-द्वितीयोऽर्थः। अत्र तृतीयोऽर्थः-गोस्वामी राजा, गौः पृथ्वी, तस्याः स्वामी, नरेन्द्रः। गोस्वामिनि सूर्ये (१) गोस्वामिनि गोपाले (२) गोस्वामिनि राजनि (३) दृष्टमात्रे सति चौरैः पशवो मुच्यन्ते एव नाऽत्र सन्देहः। किं लक्षणे गोस्वामिनि?-स्फुरिततेजसि, दीप्ततेजसि, स्फुरितं तेजो यस्य स स्फुरिततेजाः, तस्मिन् स्फुरिततेजसि।।९।।

❁ **त्वं तारको जिन! कथं भविनां त एव;**
**त्वामुद्वहन्ति हृदयेन यदुत्तरन्तः।**
**यद् वा दृतिस्तरति यज्जलमेष नून-**
**मन्तर्गतस्य मरुतः स किलाऽनुभावः ।।१०।।**

**(सौ.मं.)** हे **जिन**! हे जिनेन्द्र! हे स्वामिन्! **भविनां** प्राणिनां जीवानां **त्वं तारकः**। कथम्? तारयतीति तारकः। **यद्** यस्मात् कारणात्, **त एव** प्राणिनः संसारसमुद्रं

१.उत्तरार्धं यथा, २. ....., गौरुदके दृशि। स्वर्गे दिशि पशौ रश्मौ वज्रे, भूमाविषौ गिरि। हैमानेकार्थं-६।

**उत्तरन्तः** सन्तो, **हृदयेन त्वां उद्वहन्ति** धारयन्ति। अत एव तेषां प्राणिनां त्वं तारकः कथम्? वहनीयस्य तारकत्वं न स्यात्, प्रत्युत संमुखं [1]त्वां ते तारयन्ति इति युक्तमेतत्- (एवं) संशयं कृत्वा परिहारमाह कविः- [2]यद् वा संदेहनिराकरणे-करणे- [3]दृति(:) खल्ल-चर्ममयी सनाहिक्यजलतरणिः (१) किलेति सत्ये नूनं निश्चितम्। **एष अन्तर्गतस्य मरुतः** पवनस्य प्रभावः। नान्यत् किमपि कारणम्। यदि भव्यास्त्वां हृदये [प्र] धार्य [निधाय] संसारार्णवं तरन्ति, तत् तवैव माहात्म्यमिति भावः ॥१०॥

❁ **यस्मिन् हरप्रभृतयोऽपि हतप्रभावाः,**
**सोऽपि त्वया रतिपतिः क्षपितः क्षणेन।**
**विध्यापिता हुतभुजः पयसाऽथ येन,**
**पीतं न किं तदपि दुर्धर-वाडवेन?** ॥११॥

**(सौ.मं.) हरप्रभृतयोऽपि** देवाः, ईश्वरप्रमुखा अपि देवाः। **यस्मिन्** कन्दर्पे, **हतप्रभावाः** हतप्रतापाः सञ्जाताः, कन्दर्पेण सर्वेऽपि देवा जिताः, प्रभो! **त्वया सोऽपि** रतिपतिः कन्दर्पः, **क्षणेन** क्षणमात्रेण, **क्षपितः** क्षयं नीतः। अत्रार्थे [3]दृष्टान्तः-येन **पयसा** पानीयेन, **हुतभुजो** वैश्वानराः, **विध्यापिताः** निर्वापिताः शान्तिं प्रापिताः। पानीयेनाऽग्निः शाम्यति। अतः पश्चाद् दुर्धरवाडवेन [4]दुष्टवडवानलेन, तदपि पानीयं किं न पीतं? अपि तु पीतमेव॥११॥

❁ **स्वामिन्ननल्पगरिमाणमपि प्रपन्नास्-**
**त्वां जन्तवः कथमहो हृदये दधानाः?** ।
**जन्मोदधिं लघु तरन्त्यतिलाघवेन,**
**चिन्त्यो न हन्त महतां यदि वा प्रभावः** ॥१२॥

**(सौ.मं.)** हे **स्वामिन्! जन्तवः अतिलाघवेन** वेगेन **जन्मोदधिं** संसारसमुद्रं कथं

---

१. यो यं उद्वहति, स तस्य तारक इति प्रकटम्-माणिक्यचन्द्रप्रणीतवृत्तौ । २. ...करणे दृतिः जलं तरति, 'किल' इति सत्ये....नान्यत् किमपि कारणं, दृतिः खल्लचर्ममयी लोके 'मसक' प्रसिद्धिः, इहोपनयः इह भव्याः-क०। (खल्ल = खाल=मृतकनी चामडी, मसक=ढोरनी खाल(=चामडी)नी बने छे) ३. दृष्टान्तः, उत्तरार्धं यथा 'विध्यापिता' इति येन -क०। ४. उत्कटवडवानलेन -क०।

**तरन्ति,** केन प्रकारेण तरन्ति? किं (कुर्वन्तः) जन्तवः? **हृदये त्वां** दधानाः-जन्तवः त्वां धारयन्ति। किंलक्षणं त्वाम्? **अनल्पगरिमाणमपि** प्रौढमहिमानमपि। तर्हि कथं तरन्ति? वहनीयस्य तारकत्वं न स्यात्, तर्हि तैः प्राणिभिः संसारसमुद्रः कथं तीर्णः? अतिगरिष्ठं अधिकभारत्वं (०भारं त्वां) हृदये दधानाः सन्तो मनागपि भाररहितत्वेन संसारसमुद्रं तरन्ति। यश्चातिभारयुक्तो भवति स तु तरीतुमक्षमो भवति। **यदि वा** इति समाधाने। **हन्त** इति निश्चितम्। **महतां** महानुभावानां जगत्त्रयेऽपि प्रकृष्टानां **प्रभावो** महिमाऽचिन्त्यः, चिन्तयितुं शक्यो **न**। महतां माहात्म्यं मनसापि कृत्वा चिन्तयितुं न शक्यते इत्यर्थः। **यदि वा** इत्याश्चर्ये। महतां महापुरुषाणां **प्रभावश्चिन्त्यो न**। महतां प्रभावश्चिन्तयितुं न शक्यते इति भावः॥१२॥

❁ **क्रोधस् त्वया यदि विभो! प्रथमं निरस्तो-**
**ध्वस्तास् तदा बत कथं किल कर्मचौराः?।**
**प्लोषत्यमुत्र यदि वा शिशिराऽपि लोके;**
**नीलद्रुमाणि विपिनानि न किं हिमानी?** ॥१३॥

(सौ.मं.) हे **विभो**! हे स्वामिन्! **यदि** चेत् **प्रथमं** पूर्वं **त्वया क्रोधो निरस्तः** सर्वथा प्रकारेण त्यक्तः। **यदि** तदा इत्याश्चर्ये। **किलेति** सम्भावनायाम्। **कर्मचौराः कथं ध्वस्ताः** कथं व्यापादिताः? क्रोधं विना व्यापादनधर्मो नास्ति, तर्हि कर्मचौराः क्रोधं विना कथं हताः? अमुमेवार्थं कविर् दृष्टान्तेनाह-[1]**यदि** चेत् सन्देहनिराकरणे। **हिमानी** हिमसमूहः **अमुत्र** लोके इहलोके, **विपिनानि**[2] किं न प्लोषति किं न दहति? अपि तु दहत्येव, '[3]श्रिषु-श्लिषु-प्रुषु-प्लुषु-उष दाहे' [कातन्त्र-धातुपाठे-१/२२९] धातोः प्रयोगः। किंलक्षणा हिमानी?? **शिशिरापि** शीतलापि, हिमानी वनानि दहति, तथा भगवता परमेश्वरेणापि क्षमया एव कर्मचौराः हताः। महद्हिमं हिमानी। हिमादेः आप् प्रत्ययः। रूपावतारसूत्रमिदम् ॥१३॥

❁ **त्वां योगिनो जिन! सदा परमात्मरुप-**
**मन्वेषयन्ति हृदयाम्बुजकोशदेशे-।**
**पूतस्य निर्मलरुचेर्यदि वा किमन्य-**
**दक्षस्य संभवि पदं ननु कर्णिकायाः** ॥१४॥

१. दृढयति, उत्तरार्धं यथा, 'यदिवा' इति संदेहः-क० । २. नीलाः द्रुमाः येषु तानि-नीलद्रुमाणिः
३. तुलना-उषु-श्रिषु-श्लिषु-प्रुषु-प्लुषु दाहे (है.धातुपाठे ५२९-५३३)

**(सौ.मं.)** हे **जिन! योगिनो** जितेन्द्रियाः, **हृदयाम्बुजकोशदेशे** हृदयकमलकोशमध्ये, **सदा** सर्वदा, **त्वां परमात्मरूपं अन्वेषयन्ति** अवलोकयन्ति विचारयन्ति। पूर्वार्धं [1]व्याख्यातम्। यदि वा अथवा। [2]ननु निश्चितम्। अक्षस्य कमलबीजस्य, **कर्णिकायाः** सम्भवि उत्पत्तिस्थानं, किं अन्यत्? अपि तु न। किंविशिष्टस्य अक्षस्य?- पवित्रस्य। पुनः किंविशिष्टस्य?-निर्मलरुचेः निर्मलकान्तेः। अक्षशब्देन पद्मिनीतन्तुः कथ्यते। मालवदेशे पद्मिनीतन्तोः **'अक्ष' इति** प्रसिद्धिः। कर्णिका पद्मनालं तु, मृणालं तन्तुलं बिसम्। हैमीनाममालायां (११६५), अत्रोपनयः-यथा-पद्मिनीतन्तोरुत्पत्तिस्थानं कर्णिका। तथा योगिनां हृदये परमात्मरुपो भगवान् श्रीपार्श्वनाथः।।१४।।

❀ **ध्यानाज्जिनेश! भवतो भविनः क्षणेन,**
**देहं विहाय परमात्मदशां व्रजन्ति; ।**
**तीव्रानलादुपलभावमपास्य लोके,**
**चामीकरत्वमचिरादिव धातुभेदाः ।।१५।।**

**(सौ.मं.)** जिनस्य ध्यातारोऽपि जिनसदृशा एव जायन्ते इत्येतज्जिनमाहात्म्यं प्रतिपादयन् काव्यत्रयमाह-हे **जिनेश**! हे स्वामिन्! **भविनः** प्राणिनः, **क्षणेन** क्षणमात्रेण **देहं विहाय** परित्यज्य **परमात्मदशां** परमात्मस्वरूपं **व्रजन्ति** परमात्मरूपं प्राप्नुवन्ति। कस्माद्? **भवतः ध्यानात्**। अमुमेवार्थं कविर्दृष्टान्तेन दृढयति। भविनः के इव? यथा **धातुभेदा लोके** लोकमध्ये **उपलभावं** पाषाणरूपं, **अपास्य** परित्यज्य **अचिरात्** स्तोककालात् **चामीकरत्वं** प्राप्नुवन्ति स्वर्णभावं लभन्ते। कस्मात्? **तीव्रानलात्**। तीव्रवैश्वानरात्। अत्रोपनयः - प्राणिनः धातुभेदसदृशः, भगवतो ध्यानं अनलसदृशं। यथा अनलसंसर्गात् ताम्रादिधातवश्चामीकरत्वं लभन्ते तथा भगवतो ध्यानात् प्राणिनः, सिद्धिपदं लभन्ते।।१५।।

❀ **अन्तः सदैव जिन! यस्य विभाव्यसे त्वं,**
**भव्यैः कथं तदपि नाशयसे शरीरम्?।**

---

१. उत्तरार्धं यथा- 'पूतस्य' इति -क०। २. अन्वयभेदः - ननु निश्चितम्, यदि वाऽथवा अक्षस्य पद्मिनी बीजस्य संभव (वि) पदं अक्षस्योत्पत्तिस्थानं कर्णिकैव, किं भूतस्य अक्षस्य? पूतस्य पवित्रस्य इति-क०।

**एतत् स्वरूपमथ मध्यविवर्त्तिनो हि,**
**यद् विग्रहं प्रशमयन्ति महानुभावाः ।।१६।।**

**(सौ.मं.)** हे **जिन**! हे स्वामिन्! **सदा** सर्वदा **एव** निश्चयेन, **भव्यैः** प्राणिभिः, यस्य शरीस्य **अन्तर्मध्ये त्वं विभाव्यसे** ध्यायसे, तदपि शरीरं त्वं **कथं नाशयसे**। इदं युक्तं न, कृतघ्नलक्षणम्। अत्र [1]निन्दास्तुतिः, पूर्वं निन्दा, पश्चात् स्तुतिः। **अथ महानुभावाः पुरुषाः यद् विग्रहं प्रशमयन्ति। एतत् स्वरूपं** एषः स्वभावः। [2]विग्रहशब्देन कलहः शरीरं च, अत्र [3]शब्दविश्लेषः। किंलक्षणा महानुभावाः? **मध्यविवर्तिनः** मध्यचारिणः। एतावता को भावः? भगवतो ध्यानेन जीवाः [4]कृत्रिमं देहं परित्यज्य मुक्तिपदं लभन्ते। अत्र शब्दविश्लेषः।।१६।।

❁ **आत्मा मनीषिभिरयं त्वदभेदबुद्ध्या;**
**ध्यातो जिनेन्द्र भवतीह भवत्प्रभावः।**
**पानीयमप्यमृतमित्यनुचिन्त्यमानं,**
**किं नाम नो विषविकारमपाकरोति? ।।१७।।**

**(सौ.मं.)** हे **जिनेन्द्र**! हे प्रभो! **मनीषिभिः** पण्डितैः, **अयं आत्मा त्वदभेदबुद्ध्या** त्वदेकाग्रबुद्ध्या **ध्यात [इह]** अस्मिन् इहलोके [5]**भवत्प्रभावो** भवति, भवत्सदृशो भवति। अत्र संशयो न, **'वीतराग' इति ध्यानात् वीतराग इति पदं लभेत। ईलिका भ्रमरीध्यानाद् ध्यायन्ती भ्रमरी भवेत्।** इति [6]श्लोकवचनात्। **पानीयमपि** जलमपि **'अमृतं' इत्यनुचिन्त्यमानं** संचिन्त्यमानं सत्, **नाम** इति कोमलामन्त्रणे, प्रसिद्धेऽर्थे वा। **किं विषविकारं** विषस्य दोषं नो **अपाकरोति** न दूरीकरोति? अपि तु अपाकरोत्येव। पानीयमप्यमृतममृतमित्यनुचिन्त्यमानं विषविकारं विषव्याधिं किं न

१. अत्र 'व्याजस्तुति र्नामाऽलङ्कारः,' स्तुति-निन्दयोरन्यतरपरतया 'व्याज स्तुति०-काव्यानुशासन ०६/१५'। २. विग्रहो युधि विस्तारे प्रविभाग-शरीरयोः-[हैम-अनेकार्थ ७६४] । ३. 'अत्र' श्लेषनामाऽलङ्कारः, लक्षणं च तस्य 'अर्थभेदभिन्नानां भङ्गा-ऽभङ्गाभ्यां युगपदुक्तिः श्लेषः, काव्या०।५(६)।४. कर्म देहं च परि०-क.।५. भवद्वत् प्रभाववान् इत्यर्थः।६. 'इति शास्त्रवचनात्, उत्तरार्धं, यथा' पानीयमिति, 'नाम' इति संभावनायां, पानीयमपि अमृतं अमृतमित्यनुचिन्त्यमानं विषविकारं विषव्याधिं किं न अपाकरोति?-अपि तु अपाकरोत्येव-अत्र को भावः-क०।

अपाकरोति, अपि तु अपाकरोत्येव। अत्र को भाव:। यथा विषार्त्त: प्राणी मणिमन्त्रपूतं पानीयं अमृतमिव मन्यमानो निर्विषो भवति। यदुक्तं [हैमी] नाममालायां-कीलालं भवनं वनं घनरसो यादो निवासोऽमृतम् (१०६९)।।१७।।

❁ **त्वामेव वीततमसं परवादिनोऽपि,**
**नूनं विभो! हरिहरादिधिया प्रपन्ना:।**
**किं काचकामलिभिरीश! सितोऽपि शङ्खो-**
**नो गृह्यते विविधवर्णविपर्ययेण ? ।।१८।।**

(**सौ.मं.**) हे **विभो**! हे स्वामिन्! **नूनं** निश्चितं, **परवादिनोऽपि** मिथ्यात्विनोऽपि, एवं निश्चयेन त्वां प्रपन्ना:, त्वां आश्रिता:। कया? **हरिहरादिधिया** विष्णु शङ्करबुद्ध्या, आदिशब्दात् ब्रह्मापि। परवादिन: स्वचेतसि एवं मन्यन्ते, एवं किं? अयमेव वासुदेव: भगवान्, शङ्करश्च। किंलक्षणं त्वां?- **वीततमसं** वीतं गतं तम: रागद्वेषलक्षणं यस्मात् स वीततमा:, तं वीततमसं वीतरागम्। अमुमेवार्थं कविर्दृष्टान्तेन दृढयति। हे **ईश**! हे स्वामिन्! [1]**काचकामलिभि:** पुरुषै: हारिद्रकरोगग्रस्तै:? **सितोऽपि** धवलो(ऽपि) **शङ्ख: विविधवर्णविपर्ययेण किं नो गृह्यते**? अपि तु गृह्यते? एव। कोऽर्थ:? काचकामल-दूषितदृष्टिदोषस्य पुरुषस्य शङ्खो धवल: न दृश्यते। स तु वलमानमेव ब्रूते 'शंखोऽयं पीतो' दृश्यते। शङ्ख: कदाचित् कालत्रयेऽपि पीतो न भवति। स तु शङ्ख: सर्वदाऽपि धवल:, तथा परवादिन: परशासनीया विष्णुशङ्करबुद्ध्या जगन्नाथं ध्यायति।।१८।।

❁ **धर्मोपदेश समये सविधानुभावा-**
**दास्तां जनो भवति ते तरुरप्यशोक:।**
**अभ्युद्गते दिनपतौ समहीरुहोऽपि,**
**किं वा विबोधमुपयाति? न जीवलोक: ।।१९।।**

(**सौ.मं.**) हे प्रभो! **जनो** लोक:, **आस्तां** दूरे तिष्ठतु, **तरुरपि** वृक्षोऽपि, **ते** तव, **धर्मोपदेशसमये अशोको भवति** शोकरहितो भवति। न विद्यते शोको यस्य यस्मिन् वा स अशोक:। कस्मात्? - **सविधानुभावात्** समीपभावात्। परमेश्वरस्य मस्तकोपरि द्वादशगुण:

१. उत्तरार्धं यथा किं काच....।

अशोको [1]भवति। दृष्टान्तेन दृढयति। वाऽथवा। **दिनपतौ** श्रीसूर्ये, **अभ्युद्गते** सति उदयं प्राप्ते सति **समहीरुहोऽपि जीवलोकः बोधं** प्रकाशं **किं न उपयाति**? अपि तु उपयात्येव। यदि प्रभाते सूर्यः उदयं प्राप्नोति, तदा मनुष्यलोको जागर्ति, वृक्षा अपि जाग्रति, स्थितिरियम्।।१९।।

❁ **चित्रं विभो! कथमवाङ्मुखवृन्तमेव,**
**विष्वक् पतत्यविरला सुरपुष्पवृष्टिः?।**
**त्वद्गोचरे सुमनसां यदि वा मुनीश!,**
**गच्छन्ति नूनमध एव हि बन्धनानि** ।।२०।।

**(सौ.मं.)** हे **विभो! सुरपुष्पवृष्टिः विष्वक्** समकालं **अवाङ्मुखवृन्तमेव** अधोमुखवृन्तं एव, **कथं पतति**, इदं चित्रं आश्चर्यम्। किंलक्षणा सुरपुष्पवृष्टिः? -**अविरला** बहुला। भगवतः समवसरणे आजानुप्रमाणं देवाः पुष्पवृष्टिं कुर्वन्ति। **यदि वा** अथवा हे **मुनीश! नूनं** निश्चितं **त्वद्गोचरे** तव दृष्टौ, **सुमनसां प्राणिनां**, सुमनसां कुसुमानां [च], **बन्धनानि अध एव गच्छन्ति**। शोभनं मनो येषां ते [2]**सुमनसः मनुष्याः। पक्षे सुमनसः कुसुमानि** कथ्यन्ते। अत्र शब्दविश्लेषः ।।२०।।

❁ **स्थाने गभीरहृदयोदधिसंभवायाः,**
**पीयूषतां तव गिरः समुदीरयन्ति ।**
**पीत्वा यतः परमसंमदसङ्गभाजो-**
**भव्या व्रजन्ति तरसाप्यजरामरत्वम्** ।।२१।।

**(सौ.मं.)** हे **विभो! बुधाः** विद्वांसस्, **तवगिरस्**-तव वाण्याः, **पीयूषतां** अमृततां **समुदीरयन्ति** कथयन्ति, तत् **स्थाने** युक्तमिदम्, किंलक्षणाया गिरः?

१. उत्तरार्धं यथा - अभ्युद्गते...इति वा-क०। २. सुमनसां भक्तचित्तानां देवानां वा...पुष्पाणि सुमनसः प्रोच्यन्ते...कनककुशलटीका। सुमनस् शब्देन सहृदयाः जनाः पुष्पाणि च प्रोच्यन्ते-माणिक्य टीका० किन्तु हैमानेकार्थसंग्रहे तु '....' सुमनः=प्राज्ञदेवयोः (७५४) तथा पुष्पं सूनं सुमनस्-[अभि. चिन्ता०११२५]

**गभीरहृदयोदधिसम्भवायाः**, समुद्रः, .....गभीरहृदयोदधिः-समुद्रः, तस्मिन्नुत्पन्नायाः। हृदयमेव उदधिः हृदयोदधिः, [गभीरश्चासौ हृदयोदधिः] तस्मिन् सम्भवो यस्याः सा [गभीर] हृदयोदधिसम्भवा, तस्याः [गभीर] हृदयोदधिसम्भवायाः। युक्तोऽयमर्थः। अमृतमपि समुद्रात् समुत्पद्यते। दृष्टान्तेन कथयति[1]। यतः यस्मात् कारणात्, **भव्याः** प्राणिनः तां गिरं पीत्वा अत्यादरेण श्रुत्वा, **तरसा** वेगेनापि **अजरामरत्वं व्रजन्ति** प्राप्नुवन्ति। युक्तोऽयमर्थः। अमृतपानेन अजरामरत्वं सम्भवति। किंलक्षणाः भव्याः?-**परमसंमदसङ्गभाजः**। परमश्चासौ संमदश्च परमसंमदः, परमसंमदस्य सङ्गः परमसंमदसङ्गः, परमसंमदसङ्गं 'भजन्तीति' परमसंमदसङ्गभाजः। परमप्रमोदपरायणा इत्यर्थः।।२१।।

❁ **स्वामिन्! सुदूरमवनम्य समुत्पतन्तो-**
**मन्ये वदन्ति शुचयः सुरचामरौघाः ।**
**'येऽस्मै नतिं विदधते मुनिपुङ्गवाय,**
**ते नूनमूर्ध्वगतयः खलु शुद्धभावाः'** ।।२२।।

**(सौ.मं.)** हे **स्वामिन्**! अहं एवं **मन्ये**। **सुरचामरौघा** देवचामरसमूहाः । **इति वदन्ति** (इति कथयन्ति।) । किं लक्षणाः, चामरौघाः? **-शुचयो** निर्मलाः। इतीति किम्? **ये** पुरुषा **अस्मै मुनिपुङ्गवाय** मुनिश्रेष्ठाय **नतिं** नमस्कारं **विदधते** कुर्वन्ति, **खलु** निश्चितम्। **नूनमिति** सन्देहनिराकरणे। **ते** पुरुषाः **ऊर्ध्वगतयोः** भवन्ति ऊर्ध्वगतिं यान्ति। किं लक्षणास्ते? - **शुद्धभावाः** निर्मलचित्ताः। **सुरचामरौघाः** किं कुर्वन्तः? - सुदूर (रं) यथा स्यात् तथा [2]अविनश्यत्वात् ऊर्ध्वं गच्छन्ति ।।२२।।

(क्रमशः...)

१. उत्तरार्धं यथा 'पीत्वा' इति २. अवनम्य समुत्पतन्तः गच्छन्तः -क०

# महामहोपाध्यायश्री यशोविजयजी विरचित श्री पार्श्वनाथ जिन स्तवनाऽनुवादः

-*अनुवादकर्त्रीः साध्वीजीश्री विरागदर्शनाश्रीः

श्री पार्श्वनाजिन स्तवना

करुणासायर श्री जिनपास, गिरि (रु)'ओ गुणनिधिलीलविलास,
साहिज (ब) जो मिलइं, मेरो मनको प्यारो जो मिलइं,
तो पूगइ मुज वंछित आस, अलिय विघननो छूटइं पास ।।२।। साहिब०
दृग्दर्शन देखनकूं तिरसइ, चिंतवत रयनि विहाइं ।।३।। साहिब०
मनमइं लागो गुनको वेध, 'मो'तो कोई न जानइ भेद ।।४।। साहिब०
सबरस लागइ फीके और, मन दोरइं प्रभु गुनकइ ठोर ।।५।। साहिब०
प्रभु गुन गाती जाइं जेह, खिण लव गणिइं लेंखइ तेह ।।६।। साहिब०
जे बोलइ प्रभु गुन चरित्र, जीहा मानु तेह पवित्र ।।७।। साहिब०
जब संभारुं प्रभु गुन गेह, रोमंचित तब थाइं देह ।।८।। साहिब०
चरन चाकरीं चाहूं चित्त, देव एक जाणुं जगमित्त ।।९।। साहिब०
जगि छइं प्रभुना दास अनेक, माहरे साहिब एहज एक ।।१०।। साहिब०
त्रिकरण शुद्धि सेवुं देव, भवि भवि मांगुं एहनी सेव ।।११।। साहिब०
इणि आकीदइं मिलिओ रे नाथ, मिं पामिओ शिवपुर साथ ।।१२।। साहिब०
प्रभु मिलवानुं ए अहिनाण, जे लहइं जिनशासन ना (भा) ण ।।१३।। साहिब०
किजइं क्रोधादिकनो त्याग, प्रभु मिलवानो एहज लाग ।।१४।। साहिब०
श्री नयविजय विबुधनो सीस। बोलइ पास भजो निशदीस ।।१५।। साहिब०

* * *

(राग :- शांति जिनेश्वर साचो साहिब...)

करुणासागरः श्री जिनपार्श्वः, गुरुको गुणनिधिलीलाविलासः
यदि मिलेत् मम मनलोभनः, मिलेत् प्रियः प्रभुः जगत्शोभनः ।।१।।
ततः पूर्णं मम सर्वाभीष्टं, नष्टं दुष्टदुरितानिष्टम् ।।२।।
त्वद्दृष्टिदर्शनतृष्णातृषया, व्यतीता मम रजनिस् त्वरया ।।३।।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्तिनी ।

मम मनसि लग्नः गुणवेधः, केनापि न ज्ञायते तव मम भेदः ।।४।।
सर्वरसो लगति निःस्वादो जगति, प्रभुगुण एव मनो धावति ।।५।।
ये गताः लवाः प्रभुगुणगाने, ते भवन्ति सुसफलाः जाने ।।६।।
त्वद्गुणगीतिर्यया सङ्गीता, सा भवति जिह्वा परमपवित्रा ।।७।।
यदा स्मरामि प्रभुगुणगेहं, तदा भवति रोमाञ्चितो देहः ।।८।।
स्पृहयामि ते शरणं पवित्रं, मन्ये जिनं! त्वामेकं विश्वमित्रम् ।।९।।
भक्ता अनेकास् तवान्तर्यामिन्!, मम देवस् त्वमेकः स्वामिन्! ।।१०।।
त्रिकरणशुद्ध्या त्वां सेवे सदैव, भवे भवे याचे सेवां तवैव ।।११।।
मूर्त्या मिलितो त्वमेह नाथ !, प्राप्तो मया शिवपुरसार्थः ।।१२।।
एकं हि प्रभुमिलनमभिज्ञानं, यो लभते जिनशासनज्ञानम् ।।१३।।
यदि क्रियते क्रोधादिकत्यागः, सैव हि प्रभुमिलनमार्गः ।।१४।।
श्री **नयविजयविबुधसुशिष्यो**, वदति पार्श्वं भजत जगदीशम् ।।१५।।

# खण्ड–२

# यशोप्रज्ञादर्शनम्

(आदिजिनं वन्दे गुणसदनं....)

सद्गुरुं वन्दे गुणसदनं, सदनन्तभावविशुद्धम् रे,
शुद्धक्रियागतलक्षणयुक्तं, युक्तवचनप्रबुद्धम् रे... ।।१।।

बुद्धागमप्रसरत्शुभभावं, भावचरणपरिपूतम् रे,
पूतं येन भविजनहृदयं, हृदयङ्गमगुणभृतम् रे... ।।२।।

भृतं यस्मिन् सम्यग् ज्ञानं, ज्ञानप्रदाने प्रवणम् रे,
प्रवणीकृतनिजशिष्यकलापं, कलापवित्रीकृतचरणम् रे... ।।३।।

चरणकरणकमलासुनिवासं, वासववन्दितचरणं रे,
चरणं सद् गुणभावविन्यासं, न्यासीकृतगुणरत्नं रे... ।।४।।

रत्नत्रयीप्रवर्धनवचनं, वचनं "श्रेयो" विस्तारम् रे,
तारं परम"दर्शन"गुणसारं, सारस्वतश्रीकारम् रे... ।।५।।

# परमज्योतिः पञ्चविंशतिका

**- *मूलकाराः महोपाध्यायश्रीयशोविजयपादाः**
**वार्त्तिककाराः आचार्यश्रीविजयकल्याणबोधिसूरिः**

ननु किंस्वरूपं भवतीदं परमज्योतिरिति चेत्?

अत्राऽऽहु :-

**निरालम्बं निराकारं, निर्विकल्पं निरामयम्।**
**आत्मनः परमं ज्योतिर्-निरुपाधि, निरञ्जनम् ।।३।।**

परमं ज्योतिरिदं निरालम्बम्, दीपादिवत् स्नेहाद्यालम्बनशून्यत्वात्। किञ्चेदं निराकारम् घटादिवद् दृश्यबाह्याकारविरहितत्वात्। अपि चेदं निर्विकल्पम्, स्तिमितोदधिसङ्काशतया विकल्पवीचिरहितत्वात्, तद्भावोऽपि परपरिणामाभावात्, आहुश्चान्यत्र-**पञ्चविंशतिका**कारा एव- (धर्मपरीक्षायाम्) ।

जलहिंमि असंखोभे पवणाभावे जह जलतरंगा ।
परपरिणामाभावे णेव वियप्पा तया हुंति ।।९७।। इति ।।

किञ्चान्यत्, निरामयमपीदम्, कर्मादिकृतविपाकागोचरत्वात्, न हि तद्विपाक-गोचरत्वेतर आत्मन आमय इति भावनीयम्।

तथैतन्निरूपाधि, सन्तमसस्थानीयभ्रान्तिभेदे तदुत्थितोपाधिभेदस्याप्या-वश्यकत्वात्, तद्भेदे चाविर्भवेदेव निरुपाधिस्वस्वभावः, अत एवोपनिषत्-उपाधिनाशाद् ब्रह्मैव-इति (आत्मोपनिषदि)। अत एवेदं निरञ्जनम्, उपाधिमूलतया रागस्य तदभावेऽनुत्थानात्, मूलं नास्ति कुतः शाखा इति न्यायात्। यतनीयमेवंविधस्य परमज्योतिष आत्मन्याविर्भावे, तद्रूपत्वात् तत्त्वतो मोक्षस्येत्यत्र तात्पर्यम्।

(क्रमशः)

---

* पू.आ.श्री विजयभूवनभानुसूरिसमुदायवर्त्ति ।

# वृत्तं यशोविजयवाचकपुङ्गवानाम्

- *मुनिश्री सम्यग्दर्शनविजयगणिः

(परमश्रद्धेयवाचकवर्याणामनुपमं चरितं पञ्चमाङ्काद् यत् प्रारब्धं तत्र भारतवर्षे गूर्जरदेशे-कनोडाग्रामशोभावर्णननामप्रथमस्तबके शिशिरवसन्तर्तुवर्णनं कृत्वाऽधुना ग्रीष्मादिवर्णनं प्रस्तूयते)

गुर्जरप्रदेशरत्नभूते कनोडाग्रामे धन-धन्यादि-समृद्धा बहवो धार्मिका प्रतिवसन्ति स्म। स्वस्वाभीष्टदेव-दर्शन-वन्दन पूजनादिभिर्दिनानि व्यतीयन्ति स्म। तत्र जिनवचनभावितचित्ता, निश्चलसम्यग्दर्शनत्वेन निर्व्यूढधर्मशासनकर्तव्या, अनित्यादि-भावनादि-भावितचेतस्कतया दृढभववैराग्यवन्तः, आर्हत-श्रमणोपासकाः प्रतिवसन्ति स्म। ते प्रत्यहं देवाधिदेव-वीतराग-तीर्थंकरप्रासादं गच्छन्ति स्म। तत्र पूजयन्ति परमात्मप्रतिबिम्बं स्तुवन्ति च तेषां सद्गुणगणान्, पञ्चा-ऽष्ट-सप्तदश-नवनवतिविधैः पूजोपचारैश्चोपचरन्ति स्मः। सेवन्ते सद्गुरुचरणानि, समुद्धरन्ति साधर्मिकजनगणम् ददते दानं दीनदुःखिभ्यः, एवं प्रकारेण साक्षात्-कुर्वन्ति धर्ममाहात्म्यम्, तेष्वेकः श्रेष्ठि-श्रेष्ठो धर्मपरायणः नारायणनामापि वसति स्म। यो दुराचारदूरस्थितः, सदाचारसंस्थितः, स्वदारसंतुष्टः, स्वविभवसंतोषी, न्यायी, सर्वजनप्रियः, सङ्घबहुमानवान्, जिनमार्गपरिकर्मितमतिः, प्रज्ञौचित्यादिबहुविध-गुणरत्न-रत्नाकरः। तस्य शीलालङ्कारसुभगा सौभाग्यदेवीनाम्नी गेहिनी आसीत्। तस्यां पातिव्रत्य- विनयौचित्यादि-बहुगुणमुक्ताफलेषु माणिक्यवत् शीलगुणः प्रधानःसमस्ति स्म।

देवगुरुधर्माराधिका परमश्रमणोपासिका सा शुक्लपक्षे पार्वणज्योत्स्नावत् सच्छीलादिगुणगणेनैव पितृ-श्वसुरपक्षयोः नैर्मल्यतेजोराशिं विस्तारयामास। एवं विषयसुख मनुभवतोस्तयोः कश्चित् कालो व्यतिचक्राम।

तद् दम्पतियुगलं धर्मकर्मसु आसक्तमभवत्। सद्विचारविमर्षवतोस्तयोः सर्वसत्त्वेषु

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्ती ।

सौहार्दं, परपीडाप्रदानपराङ्मुखत्वम्, औदार्यञ्च, स्व प्रकर्षतां प्राप। सद्धर्मकर्मरताभ्यां ताभ्यां पराभूतो मदः, निराकृतः क्रोधः, पराजितो लोभः, सदौचित्यपूर्णव्यवहारेण सर्वसज्जनसुहृदः प्रीतिप्रकर्षं प्राप्ताः। एवं सुखसद्गुणमयं जीवनं जीवतोस्तयोरन्यदा सांसारिकसुखफलात्मकौ देवकुमारसदृशौ द्वौ सुतौ सञ्जातौ। तौ द्वावपि विनयविवेकमूर्त्ती, कलाकलापग्रहणैककुशलौ, रूपलावण्यव्यवहारकौशल्यादिगुणैः, रामारमाचित्ताकर्षकौ, सुसंस्कृतप्राज्याज्यवद्भोजनवदार्यसंस्कृतिसंस्कारसंस्कारितौ तौ पद्म-सिंह-जसवंत इति सान्वर्थाभिधानौ प्रतिभाप्रकर्षेण, परमप्रावीण्येन, चतुरजनचूडामणी अभूताम्। अन्यदा वर्षर्त्तुसमनन्तरं यदा पन्था निष्पङ्कीभूतः, जनैः ग्रामान्तरगमनागमनञ्च प्रारब्धम्, तदा पञ्चाचारपालनधीराः, परिषहोपसर्गसहनवीराः, पञ्चमहाव्रतपालनबद्धकक्षाः, पंञ्चसमिति-त्रिगुप्तिबद्धलक्षाः, श्रीजैनसाधुभगवन्त एकत्र चतुर्मासीं कृत्वा विहर्त्तुं लग्नाः। यतः-वर्षाचतुर्मासीं विना जैन-श्रमणा एकत्र नैव तिष्ठन्ति। यदुक्तम्

बद्धं जलं दोषमुपैति नित्यं, बद्धा जनाः स्त्रीभिरुपैति दुःखम्।
तन्नैकत्र तिष्ठेत् श्रमणस्ततोऽहो!, पृथ्व्यां निरागः विहरेत् सदैव।। (उपेन्द्रवज्रा)

यतः-

व्यपगतभवरागो, मोहमायाविमुक्तः ।
कृतभवभयत्यागः, द्वेषदोषादिमुक्तः ।।
तृण-कनक समानः, सर्वथा त्यक्तमानः ।
भवति जगति साधुर्, वीतरागस्य श्रेष्ठः ।। (मालिनी)

कदाचित् सूर्यः प्रतीच्यामुदेयात्, समुद्रो मर्यादां मुञ्चेत्, वह्निरनुष्णो भवेत्, तथापि सुसाधुः स्वाचारं नैव त्यजेत्। अत एव साधुर् नैकत्र तिष्ठति। किन्तु ऋतुबद्धकाले (विनाचातुर्मासं) मासकल्पादिना विहरत्येव। यत एकत्र वसतः साधोः संयमे मालिन्यादि-दोषा संभवेयुः। अत एकत्र-वसनं साधोः साध्वाचारविरुद्धम्।

तदा हि कनोडानगरसमासन्नं कुमारगिरि नामनगरमासीद्-अधुना तु कुणघेरेत्यपरम्ना प्रसिद्धं तद्। तत्र चतुर्मासीमुषित्वा श्रीश्रमणभगवन्महावीरस्वामिपट्टपरम्परागता-ऽकब्बरनृपप्रतिबोधकद्विसहस्रश्रमणगणनायकतपागच्छीयाऽविच्छिन्नसामाचारीसंरक्षककुम तघूकमार्तण्डस्वर्गापवर्गसुप्रसाधनसन्मार्गप्रकाशककुवादिमातङ्ग विध्वंसनशार्दूल-भट्टारकपदधारकश्रीमत्पूज्यपाद विजयहीरसूरीश्वराणां शिष्यपाठकप्रवर श्रीकल्याणविजय-गणिविनेयपण्डितप्रवरश्रीलाभविजय सुशिष्य सकलशास्त्रसिंधुप्रवेशननौसमसूक्ष्मप्रज्ञावत्-सुविशुद्धसाध्वाचारपालनैकप्रवरधैर्यवत् प्रतिभाप्रागल्भ्यप्रावीण्यत्रिकसंगमतीर्थ-श्रीमन्नयविजयाः स्वीयपदकमलरजसा ग्रामनगरपन्थानं पवित्रीकुर्वन्तः ग्रामानुग्रामं विहरन्तः समागतास्तत्र कनोडानगरे श्रमणोपासका अपि गुर्वागमनोदन्तं श्रुत्वा परमप्रमोदेन सबहुमानं

गुरुसन्मुखं समागत्य बहुविधाऽऽडम्बरेण नगरं प्राविश्य च ते सर्वे गुरुवदनवारिधरं केकीवत् संपश्यन्तस्तद्वाणीवारि पिपासवो नरीनृत्यन्ति स्म। एवं प्रत्यहं गुरुं सेवमानाः प्राज्यभक्तपानैः प्रतिलाभयन्तः, सावधानमानसाः गुरुवचनश्रुण्वन्तस् ते बहुश्रुतप्राया अभवत्। तेन भवबासपराङ्मुखा वैराग्यवन्तोऽभूवन्। तदा नारायणः सौभाग्यदेव्यपि गुरुं परिचरन्तौ। गुरुमुखकमलप्रसूतं, भवनिर्वेदजनकं, भवासक्तिवियुक्ति-कारकं, मुक्तिप्रदायकं, भवसुखे वैराग्यस्थैर्यकृत्, दुःखे समतासमाधिसंपादनसमर्थं, जिनवचनपरिमलश्चाऽऽजिघ्रतः स्म।

एकदा विबुधवरेण्यश्रीमन्नयविजयानां भाविभवविभावनैकविमला, वात्सल्य-परिपूता दृष्टिः देवकुमारसदृशजसवंतोपरि पतिता। तं दृष्ट्वा मनसि दध्युश्च ते ''अहो! अयं बालः कीदृक्? तेजस्वितयाऽस्य वदनं सूर्यमपि जयति। सूक्ष्मप्रज्ञापिशूनमस्य नयनयुगलं केषां चित्तं नाऽऽकर्षति। विपुलभालतलञ्च पुण्यप्राग्भारं सूचयति। अस्य नासानयपरा-क्रमेऽपि नम्रतां प्रकटयति। अस्य वाचा भाविभव्यनव्यसाहित्यसर्जनसामर्थ्यंशास्त्र-सिद्धान्तसिन्धु पारगमनसक्षमताञ्च सूचयति। विशालं वक्षःस्थलं विशालकार्यदक्षत्वं पिशुनयति। भुजावलयौ भूवलयभूपाऽऽशिषप्रदानदक्षौ भातः स्म। चरणौ तु द्रव्यभावसंयम-विहारयात्रा समर्थौ लगतः। सुलक्षणलक्षितोऽसौ बालो यदि परमात्मप्रज्ञप्तपरिव्रज्या-पथपान्थो भवेत् तर्हि विरलाऽपि प्रभुशासनप्रभावनारक्षा सहजा सरला भविष्यति''-इति।

– क्रमशः

# यशोगुर्जरस्तवनानुवादः

- *मुनिश्रीआत्मदर्शनविजयः

(श्रुतज्ञानप्रचारकसभाप्रकाशनेनवैक्रमीय २०७१तमे वर्षे प्रकाशितगूर्जरसाहित्यसङ्ग्रह-पुस्तकमुद्रितानां महामहोपाध्यायश्रीयशोविजयगणिभी रचितगूर्जरस्तवनानां संस्कृतगद्यानुवादः क्रमशः प्रकाश्यतेऽत्र।)

७२. हे प्रभो! यो तव सूत्रार्थं गुर्वाज्ञानिरपेक्षं निर्देशयति, तस्य वचनानि मह्यं न रोचन्ते ।।१।। यद् वस्तु शुद्धभावनिक्षेपे वर्तते, तस्य चत्वारा अपि निक्षेपाः शुद्धाः कथ्यन्ते। एकभावनिक्षेपेऽशुद्धे सति शेषाः सर्वेऽपि निक्षेपा अशुद्धा भवन्ति ।।१२।। हे नाथ! यस्योपरि तव करुणादृष्टिः पतति स एव शुद्धार्थं वक्तुं जानते, नान्यः। तवागमस्य शुद्धप्ररुपको जीवः -यशोमृतरसमास्वादयति ।।२५।।

**(१५० गाथास्तव ढाल-१, पृष्ठ-२५४)**

७३. हे परमात्मन्! जगति तव शासनसादृश्यं न किमपि धर्मशासनमावहते, यथा यथाऽहं तव शासनं युक्त्याधिगच्छामि, तथा तथा मम शासनरागोऽभिवर्द्धते ।।१।। या जिनशासनस्य उद्भासना सा सम्यक्त्वाचाररुपा ज्ञेया; अतो जिनपूजां यः करोति सोऽक्षयसुखकोशं प्राप्नोति ।।२५।।

**(१५० गाथास्तव ढाल-३, पृष्ठ-२५९)**

७४. यथा मुनेर्नद्युत्तरणकाले जलगतजीवेषु करुणारसो भवति तथा जिनपूजाकाले श्रावकस्यापि पुष्पादिजीवेषु भव्यः करुणारसो भवति।।१०।।

**(१५० गाथा स्तव ढाल-४, पृष्ठ-२६६)**

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्ती।

७५. एवं वीतरागं द्रव्येणार्चयित्वा यो नित्यं वीतरागस्यगुणान्नेव गायति स **सुयशःश्रियं** प्राप्नोति ।।२३।।

**(१५० गाथा स्तव ढाल-५, पृष्ठ-२६६)**

७६. यो मुनिस् तवाज्ञामाराधयति, सूत्राणि सयोगोद्वहनं पठति, निर्युक्तिप्रमुख-पञ्चागयुक्तद्वादशाङ्गं च प्रमाणीकरोति, तस्मिन् शुद्धसम्यक्त्वं वर्तते।।१।।

हे परमात्मन्! त्वया सूत्रस्य व्याख्या त्रिधा दर्शिता; तद्यथा, प्रथमा-केवलं सूत्रार्थः, द्वितीया-निर्युक्तिमिश्रा, तृतीया निरवशेषा इति ।।१६।।

हे स्वामिन्! तव सर्वान् गुणान् वर्णयितुं कः शक्नोति? न कोऽपीत्यर्थः। तथापि तवैकमेवाज्ञागुणलवं स्तुवता मया आगमानुसारेण सम्यक्त्वं द्रढीकृतम् ।।२३।।

हे प्रभो! यदि तवाज्ञा मम मस्तके वर्तते तर्हि मयि कुमतबलं न प्रभविष्यति। यथा यत्र केकिनः केकारवं कुर्वन्ति तत्र फणिनां किमपि बलं न प्रभवति ।।२४।।

हे प्रभो! मम जिह्वा तव गुणस्तवनैः पवित्रीक्रियते, तवाज्ञामहं शिरसि धारयामि, हृदयान्न कदाप्यहं त्वां विस्मरामि; एवं च निश्चयेन मम **सुयशः**कल्याणं भविष्यति ।।२५।।

**(१५० गाथा स्तव ढाल-६, पृष्ठ-२६६)**

७७. श्रीजिनगुणरूपसुरवृक्षपरिमलानुभवं स एक भव्यजीवो लप्स्यते, यो भ्रमरवन् नित्यमर्थीभूय गुर्वाज्ञां धारयिष्यति ।।५।।

**(१५० गाथा स्तव ढाल-७, पृष्ठ-२७०)**

(क्रमशः)

# श्रीमद्यशोविजयस्य किं कर्तृत्वम्

**- गूर्जरलेखकौ: यशःशिशू**

**-अनुवादकर्त्री *साध्वीजीश्री मुक्तिपूर्णाश्रीः**

अस्मिन् प्रस्तुतलेखमध्ये (१) विषयतावादः (२) वायूष्मादेः प्रत्यक्षा-ऽप्रत्यक्ष-त्वविवादरहस्यश्च-इत्यनयोः द्वयोः कृत्योः कर्तृत्वसंबद्ध ऊहापोहः प्रस्तुतोऽस्ति, अधुना इमे द्वे कृती, पू.उपाध्यायश्री यशोविजयगणिवरस्य रचनास्वरूपेण प्रसिद्धे स्तः। तथा वादसङ्ग्रहपुस्तकात् नवग्रन्थीपुस्तके प्रकाशिते अपि विद्येते, द्वयोः संपादनयोः मध्ये इमे द्वे कृती पू.उपाध्यायभगवद्भिः रचिते इत्युललेखोऽस्ति।

विशेषविमर्शस्य प्रारम्भस्य पूर्वे भूमिका अवश्यमेव कर्तव्या। मुद्रणयुगात् पूर्वे लेखनयुगमध्ये शास्त्राणाम्, ग्रन्थानाम्, कृतीनाम् च संक्रमणमपि प्रतिसु भवति स्म। विद्यार्थिनः स्वकीयाभ्यासे उपयोगिनः ग्रन्थस्य प्रतिलिपिं कुर्वन्ति स्म, तथा च ते ग्रन्थस्य प्रतिकृतिं गुरुकुलमध्यात् प्राप्नुवन्ति स्म, विद्वज्जनाः अपि सन्दर्भाय ग्रन्थस्य प्रतिलिपिं कुर्वन्ति स्म। तस्य ग्रन्थस्य च प्रतिकृतयः विविधैः स्रोतैरलभ्यन्त। विद्वज्जनाः स्वयमपि इदं लिपि कार्यमकुर्वन्, लिपिकारसमीपेऽपि अकारयश्च। स्वयं पू.उपाध्यायादिसप्तमुनि भगवद्भिः द्वादशारनयचक्रस्य प्रतिलिपिः कृताऽस्ति।

सामान्यरूपेण ग्रन्थस्य रचयित्रा स्वकीयग्रन्थस्य प्रथमा प्रतिकृतिः लिख्यते, तत्पश्चात् तस्य प्रतिलिपयः लिख्यन्ते। लेखकश्च केनचित् रचितग्रन्थस्य प्रतिकृतिः करोति। द्वयोः भूमिका भिन्ना भवति। किन्तु यदा ग्रन्थरचनां कर्तुं क्षमतावान् विद्वान् कस्यचित् अन्यस्य ग्रन्थस्य प्रतिकृतिं करोति, तदा भ्रमणा संभवति-किं प्रतिकृतिकृता प्रतिलिपिः कृताकृतिः तस्यैव रचना अस्ति, वाऽन्यस्य ?

प्रस्तुतद्वयोः कृत्योः सम्बद्धा ईदृशी भ्रमणा जाता संभाव्यते। विषयतावादः पू.उपाध्यायभगवतां पूर्वकालीनविद्वद्रघुदेवभट्टाचार्येण विरचित इति संभावनाऽस्ति।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्तिनी ।

इह एका प्रासङ्गिकवार्ता ज्ञातुम् योग्याऽस्ति। अस्यैव विषयतावादस्य रचयितृत्वेन द्वयोः नैयायिकयोः उल्लेखा प्राप्नुवन्ति। एको रघुदेवभट्टाचार्यस्य द्वितीयो हरिरामतर्कालङ्कारस्य च। वैक्रमीय १७३६ तमः समयः प.पू. उपाध्याय भगवतां समयोऽस्ति। तथा रघुदेवभट्टाचार्यस्य समयः वैक्रमीय १७१७ तथा हरिरामतर्कालङ्कारस्य समयो वैक्रमीय १६९७ तमः प्रायोऽस्ति। "Encyclopedia of indian philosophies" स्य क्रमनिर्देशे विषयतावादः हरिरामतर्कालङ्काराभिधानतः समुल्लिखितः। "विषयतावादः" पूना युनिवर्सीटिना प्रथमं प्रकाशितोऽभूत्, तस्मिन्नऽपि तस्य कर्तृत्वेन हरिरामनामोल्लेखोऽस्ति। 'वादवारिधिः' इत्यभिधानस्य ग्रन्थस्य सङ्ग्रहेऽपि इयमेव कृतिः हरिरामस्य अभिधानेनाऽस्ति। (वादवारिधिः (३६) संपादक-प्रकाशक-पृ.२५८ तः २६७ इति श्री हरिरामतर्कालङ्कारविरचितविषयतावादवीचिसमाप्तः। बडौदायाः ११९५९ प्रतस्य पुष्पिकायाम्-इति हरिरामकृतः विषयतावादः समाप्तः इत्युल्लेखोऽस्ति। कार्ल-पोट्टरेण-अमुमुल्लेखं दृष्ट्वैव अस्या कृतेः-कर्तृत्वेन हरिरामतर्कालङ्कारोऽमन्यत। किंतु इयं कृतिः रघुदेवभट्टाचार्यस्य स्यात्, इति बहूनि प्रमाणानि सन्ति। तेऽत्र प्रस्तूयन्ते।

१) बडौदायाम् 'विषयतावादस्य प्रतिरस्ति (२३१६३) तस्य पुष्पिका एवमस्ति-कृतं पल्लवितेन। इति श्री रघुदेवभट्टाचार्यविरचितोऽयं विषयतावाद प्रायेण () संवत् १८३८ वर्षे शाके १७६ (१७८२) प्रवर्तमाने पौषमासे शुक्लपक्षे लिखितमिदं पुस्तकं पं. आशारामात्मजेन कृपारामेणात्मपठनार्थम्।।

२) भांडारकर ओरिएंटल रिसर्च इन्स्टिट्युट् पूनायाः २४७/१८९९-१९९५ क्रमाङ्कित प्रतौ अयं अंतिमश्लोकोऽस्ति-
-रचितं रघुदेवभट्टाचार्येण धीमता, पूर्णमस्ति विषयताविवेचनमिदं शुभम्।

३) भांडारकरस्य ३०५/१८९५-१९०२ क्रमाङ्कितायाः प्रतेरन्ते इयम् पुष्पिका-ऽस्ति। -कृतं पल्लवितेन। इति रघुदेवभट्टाचार्यविरचितोऽयं विषयतावाद समाप्ति-पाप।

४) सर्वस्मात् महत्त्वभूतं प्रमाणं-रघुदेवभट्टाचार्येण 'पदार्थ खंडन व्याख्या' एष-ग्रन्थो व्यरचि। तस्मिन् स्वविषयतावादस्य-'अधिकं विषयताविचारेऽनुसन्धेयमिति संक्षेपः इति ज्ञापयित्वा अतिदेशः कृतः।

इति अयं ग्रन्थो रघुदेवभट्टाचार्यस्य अस्ति, इत्यादि सबलानि प्रमाणानि सन्ति। तथापि प्रस्तुतोहापोहस्य मुख्याचर्चा विषयतावादः पू.उपाध्यायजी भगवद्भिः रचितो न वा? एवमस्ति। उक्तानि प्रमाणानि 'पू.उपाध्यायभगवद्भिः' रचितो नास्ति–इमाम् संभावनां पुष्णाति।

भ. पू.उपाध्यायभगवद्भिः रचितः, तस्य एकमात्रं प्रमाणं–अस्याः कृतेः स्वलिखिता हस्तप्रतिरस्ति, इयं हस्तप्रतिः च नीतिविजयज्ञानभंडारटेकरी, खंभातनगरेऽस्ति, तस्याः पञ्च पत्राणि सन्ति। तेषु आदौ अन्ते वा कुत्राऽपि उल्लेखो नास्ति। विषयतावादस्य पूर्वकृतेः अक्षरशः प्रतिकृति एव अस्ति, पुनः तस्मिन् जैनदर्शनविषयी कश्चिदपि विचारः प्रकटो न स्यात्। विषयताविषयी स्वमतसिद्धांतः पू.उपाध्याय भगवद्भिः प्रमेयमालायां दर्शितः।

पू.मु.श्री जयसुंदरविजयेन खंभातनगरस्य, अमदावादस्य देवसापाडायाः च प्रतेराधारेण अस्यः कृतेः संपादनं क्रियते। प्रस्तावनायां च देवसापाडायाः चतुर्पत्रप्रतेरुल्लेखः कृतः, किंतु इयं प्रतिः देवसापाडायाम् नोपलब्धाम्, अधुना च संपूर्णो ज्ञानभंडार एव स्थलांतरितोऽभूतः।

इति पू.उपाध्यायभगवद्भिः पूर्वकालीनैः विद्वद्भिः रचिता कृतिः उपलब्धा स्यात्, तत् तस्मात् पू.उपाध्यायभगवान् अस्याः कृतेः रचयिता न किन्तु लेखनकर्ता अस्ति एवम् संभावना। द्वादशारनयचक्रवत् विषयतावादस्य अपि पू.उपाध्यायभगवद्भिः केवलं प्रति-लिपिः क्रियते। किंतु तेषाम् हस्ताक्षराणि दृष्ट्वा भ्रमणा भवति।

द्वितीया कृतिः वायूष्मादेः प्रत्यक्षाप्रत्यक्षत्वविवादरहस्यम् नामाऽस्ति। अस्याः कृतेः संपादकीय–पू.मु.श्री जयसुंदर विजयेन इति विज्ञप्तम्–

(इस (रहस्यवादकी) एकमात्र प्रति खंभात के जैन अमरशालाके भंडार से प्राप्त हुई है। जिसमें आठ पत्र है। इस प्रत के हस्ताक्षर पू. उपाध्यायजीके है, या दूसरे के इसमें संदेह है। फिर भी प्रतिका लेखनकाल वही प्रतीत होता है, जो पू.उपाध्यायजी भगवंत का जीवनकाल हैं।)

इयं कृतिः पू.उपाध्यायभगवतामेव अस्ति–इति ज्ञापयदन्यत् अन्यत् प्रमाणं नास्ति, एवं अन्यस्य कस्यचित् वा, इति सूचितवन्तं स्पष्टप्रमाणमपि नास्ति। अस्यग्रन्थस्य एका हस्तप्रतिः अस्ति, सापि पू.उपाध्यायभगवद्भिः स्वहस्तेन लिखिता, इति संदेहः। तर्ह्यपि तद् उपाध्यायभगवद्भिः लिखिता एवम् ज्ञात्वा तत्कर्तारः पू.उपाध्यायभगवंत–इति मन्यते। अस्मिन् विषये निर्णेतुम् एका पङ्क्तिः अस्यामेव प्रतौ मिलति। प्रतेः प्रथमपृष्ठे

'मथुरानाथवायुवाद'–इति लिखितं दृश्यते, अनेन नाऽयं ग्रन्थः पू.उपाध्याय-भगवताम्, किंतु मथुरानाथस्य इति ज्ञातुं पर्याप्तम्। यावत् पू.उपाध्यायभगवद्भिरपि अनया रीत्या [ ] कोष्ठके ग्रंथाभिधानं लिखितं स्यात्, तादशा अन्येऽपि साक्षीपाठास्सन्ति।

१) नयचक्रवालटीकाया: प्रथमपत्रम्।

२) स्याद्वादरहस्य प्रथमपत्रम्।

३) नयरहस्यप्रकरण-द्वादशीयं पत्रम्।

४) वादमाला-अंतिम पृष्ठः

इति-[ ] कोष्ठके कृतस्य अस्य उल्लेखस्याधारेण इयं कृति: मथुरानाथस्य अस्ति, इति निश्चितं स्यात्।

न मथुरानाथेन रचितेषु साहित्येषु अस्या: कृत: उल्लेख:। किंतु मथुरानाथस्य बहव: कृतय: अप्रकटा: सन्ति। तन्मध्ये काचित् भविष्यति (किरणावली रहस्ये मथुरानाथेन स्वरचित सिद्धांतरहस्यं, तस्योल्लेख: क्रियते, इयं कृति: तदैकभाग: स्यात् इति भविष्यति) कुत्रचन अस्या: कृते: हस्तप्रते मथुरानाथस्य उल्लेखो न स्यात्। तर्हि इयं प्रति: तस्य कर्तृत्वेन ज्ञायमानं प्रमाणं स्यात्।

पू.उपाध्यायभगवद्भि: दार्शनिकग्रन्थेषु रघुनाथभट्टाचार्यस्य बहुवादा: समीक्ष्यन्ते। रघुनाथभट्टाचार्यस्य ''पक्षतावादवादवारिधि:'' अज्ञातकर्तृत्वेन ज्ञायते, पू.उपाध्याय-भगवद्भि: तं संपूर्णवादं 'अष्टसाहस्री-तात्पर्यविवरणम्' मध्ये उद्धरितम्। तत: नैयायिकविदुष: समीपे नाऽभूत्, तादृशं अस्य वादस्य निर्णयं कुर्वत् प्रमाणं प्राप्नोति। तथा च प्रस्तुतवाद: मथुरानाथकृतोऽस्ति, तदर्थमपि अस्या: प्रतेरुल्लेख: प्रमाणं स्यात् द्वयो: कृत्यो: कर्तृत्वविषये साधकानि बाधकानि च प्रमाणानि, अत्र यथामति प्रस्तुतानि। तत्कर्तव्ये पू.उपाध्यायभगवत: प्रतिभां गौर्णीं कर्तुम् आशयो नास्ति। किंतु मात्र ऐतिहासिकतथ्यानि स्पष्टं स्यात्, प्रचलित-धारणा: इतिहासस्य प्रतिभाशालिपुरुषस्य वा गौरवं हीनं कृतवत्य: स्यात्, तर्हि तस्य पुनरवलोकनं पुन: संशोधनं च स्यात् इति कामना एव, अयम् ऊहापोह: तस्या: दिशाया: प्रथमं पदं अस्ति। तस्मिन् किञ्चिदपि इतिहासविरुद्धं लिखितं भवेत्, तर्हि क्षमां याचामहे।

# महोपाध्यायश्रीयशोविजयजीगणि-कृता:प्रकटाप्रकटकृतयः

**-गूर्जरलेखकौ यश:शिशू**
***अनुवादकर्त्रीः- साध्वीजीश्री विरागदर्शनाश्रीः**

प्रस्तुतलघुलेखे पूज्योपाध्यायश्री यशोविजयजी मुनिवरस्य तिस्रः कृतयः प्रस्तुता: सन्ति। प.पू.उपा.श्री यशोविजयजी मुनिवरेण संस्कृत प्राकृत मारुगूर्जरभाषासु प्रभूता: कृतय: विरचिता: सन्ति। **गूर्जरसाहित्यसंग्रह**नामकपुस्तके, श्रीमदुपाध्यायभगवत: प्राय: त्रिशतीनां-गूर्जरकृतीनां संग्रहो विद्यते। अस्यैव पुस्तकस्य तृतीयाऽऽवृत्तौ त्रयोदशनवीनकृतय: संयुक्ता: सन्ति। तस्मिन्नेका संस्कृतकृतिरपि वर्तते। पू.उपाध्यायजी कृतं साहित्यं अत्र-तत्र विच्छिन्नं पतितमस्ति। अहमदाबादनगरस्य देवसापाडा-ज्ञानभंडारे पू.उपाध्यायजीरचितं प्रभूतं साहित्यं विद्यते, तस्मिन् तेषां स्वहस्तलिखिता कृतयोऽपि वर्तन्ते। तत्र डा.१४० प्र.५४८रु जसविलासनामसंग्रहे द्वे कृती द्रष्टुं मिलिते स्त:। एकं श्री पार्श्वनाथभगवत्स्तवनं अपरं च श्री नेमिजिनगीतं । तत्र श्री पार्श्वनाथ भगवत्स्तवनं अद्य यावदप्रकटितम्। तदत्र द्वितीय खण्डे सानुवादं प्रकटितमस्ति।

श्रीपार्श्वनाथभगवत्स्तवनं गूर्जरसाहित्यसंग्रहेऽप्रकटितम्। इदं स्तवनं सरलं भावसारमस्ति। पू.उपाध्यायजीमुनिवर: पार्श्वनाथभगवत्स्तवनानि एकोनविंशति: रचयामास। तस्मिन्ननेन स्तवनेन सह विंशति: भविष्यन्ति। स्तवनस्य तृतीये पङ्क्तौ द्वि-त्र्यक्षराणि वाचयितुमशक्यानि, तत: तस्य भावस्यानुमानं कृत्वा 'तरसइं' पाठ: संयोजितोऽस्ति।

अपरं नेमिजिनगीतं गूर्जरसाहित्यसंग्रहे प्रकटितमस्ति, अपितु तस्य रचनाऽन्याऽस्ति। मुद्रितवृत्तौ तस्य रचना एवमस्ति।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्तिनी ।

'फागण में तजी लाज लाल, रंग हो होरी, देवरकुं रही घेरी, रंग होरी'

हस्तप्रतौ रचना एवमस्ति-

हरिनारी टोलइ मिलि रंग हो होरी, फागु रमइ तजी लाज लाल, रंग होरी...

इत्यादि वाक्यस्य भिन्नतया इयं कृतिः अप्रकटा संभाव्यते, तथापि अवलोकनेन स्पष्टं जातम्, यत् सा मुद्रिताऽस्ति। तृतीया कृतिः उपाध्यायजीमुनिवरेण स्वरचित आदिजिन-स्तवनस्य टबार्थोऽस्ति, इदं स्तवनं संस्कृतभाषाशृंखलायमकमयरचनावदस्ति। ओरिअेन्टल इन्सीट्यूट बडौदा नगरात् प्राप्तम्।

पूज्योपाध्यायजी मुनिवरस्य साहित्यं प्रति प्रीतिं दधानाः विद्वज्जना इमां कृतिं दृष्ट्वा सानन्दाः भविष्यन्तीति विश्वासेन सह इह प्रकटा कृताऽस्ति। कृतीनां सरलत्वात् तस्यार्थं कर्तुं आवश्यकता नास्ति।

# श्री महोपाध्यायजीकृत-द्वितीयस्तवनचतुर्विंशी-संस्कृतानुवादः

- *साध्वीजीश्रीप्रशमनिधिश्रीः

### श्री ऋषभजिन स्तवनानुवादः

नाथस्त्वं! मे त्वदीयोऽस्मि, दासोऽहमृषभप्रभो !
सत्या प्रीतिस्त्वया सार्धं, प्राणस्वामिन् ! मया कृता ।।१।।

मम देव ! मनोभृङ्गस्त्वद् गुणस्मरणेऽलगत्।
अन्यदेवेषु दृष्टेषु, भवेन्नाभिरति र्मम ।।२।।

भ्रमीकरोति मच्चेतस्त्वत्पार्श्वं त्रिजगद्गुरो !
किं कृतं कार्मणं नाथ!, मच्चित्तं चोरितं त्वया ।।३।।

प्रतिबन्धो मया बद्धः, त्वयैव प्राणनायक!
तदा स्नेहः प्रमाणीस्यात्, निर्वाहश्चेत् करिष्यसि ।।४।।

मत्सर्वस्वं त्वदाधीनं, रक्षणीयं सदा त्वया ।
करग्राहं गृहीत्वा मां, **प्रीतिं** रक्ष **'यशस्'**-करीम् ।।५।।

* * *

### श्री अजितजिन स्तवनानुवादः

जगदीश! गुणाधीश! प्राणेश! विजयात्मज! ।
सदैव शोभते मैत्री, त्वया साकं मुहुर्मुहुः ।।१।।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्तिनी ।

गणना त्वद्गुणानां नो, स्यात् सौभाग्यनिधे ! प्रभो!
रागरोषारिनाशिन् भो !, दाताऽसि सर्वसंपदाम् ।।२।।

त्वयि बद्धं न चेतश्चेत्, तच्चेतोऽरण्यपुष्पवत् ।
सर्वथा कूपच्छायेव, सर्वेषां तन्निरर्थकम् ।।३।।

आदितो मन्मनो लग्नं, नाथ! ते सद्गुणाकरे ।
**'वाचकः'** प्रार्थते **प्रीतिर्**-वर्धमानाऽस्तु प्रत्यहम् ।।४।।

* * *

**श्रीसंभवजिन स्तवनानुवादः**

सेनाभूः परमो नाथः, रत्नं परीक्षितं भृशम् ।
झटितं प्रीतिमुद्रायां, लब्धा नु हेमकोटयः ।।१।।

यैर्न लब्धं सता सख्यं, मन्ये तेषां वृथाऽऽमयः ।
सद्गुणिमिलनोल्लासः, साफल्यं नृभवस्य तद् ।।२।।

मम त्वद्दर्शनेनैव, दिनोऽयं सफलोऽभवत्।
मनोऽभीष्टं च सर्वं मे, प्राप्तं त्वत्प्रीतिलाभतः ।।३।।

सद्गुणिशेखरस्वामी-संभव! विश्वधुर्वह ! ।
**प्रीतिं** निर्वह मे देव! **'वाचकः'** प्रार्थयते भृशम् ।।४।।

* * *

**श्री अभिनंदनजिन स्तवनानुवादः**

देवोऽभिनन्दनो भक्त्या, सेव्यतां सेव्यतां सदा ।
यं समुपासते प्रीत्या, देव दानव मानवाः ।।१।।

ईदृग् यः सेव्यते स्वामी, साक्षाद् भवति तं स तु ।
पुण्योदयो भवेत् तस्य, निर्मलः स्वात्मसौख्यकृत् ।।२।।

गुणिसद्भिः सतां स्नेहः, हर्षदो राज्यलाभवद् ।
मन्ये त्वत्प्रीतिवृष्ट्यग्रे, तृणाय निखिलं खलु ।।३।।

मया तु लीलया लब्धो, नाथो **'यशस्'**-करस्ततः ।
विकसिताङ्गणे **प्रीतिर्**-कल्पवृक्षलता ध्रुवम् ।।४।।

# खण्ड–३

# दीक्षाशताब्दीभावाञ्जलिः

(ऋषभ जिनराज०)

रामचन्द्रं भज गुरुवरं गुणकरं,
दुःखहरं सुखकरं गुणभरम् रे,
कामक्रोधारिमित्थ्यात्वमदतमोहरं,
प्रभूतगुणकमलभरसरोवरम् रे... ।।१।।

मोक्षमार्गैकवरदेशनादायकं,
मोह रोष तोष दोषनाशकम् रे;
प्रबलवैराग्यरसबोधवचोवाहकं,
निर्वेदभावनिर्वाहकम् रे.... ।।२।।

कुमतमतिवारकं; जिनवचनस्मारकं,
शुद्धक्रियाकलापकारकम् रे,
मां 'श्रेय'स्करं, 'सम्यग्दर्शनं',
देहि गुरु! परमगुणधारकम् रे... ।।३।।

# श्री प्रेमशतकम्

(पूर्वार्धम्)

- आचार्यश्रीविजयमुक्तिप्रभसूरिः

**(छन्दः- मन्दाक्रान्ता)**

नम्रः कम्रः, प्रणतमुकुटो, देवदेवेन्द्रवृन्दो,
यत् पद्पद्मं, प्रणमति सदा, प्रेमतः प्राप्तनन्दः ।
तं देवेशं, दलितदुरितं, स्वीकृतानेकसेवम्,
वन्देऽवन्ध्य-प्रभवविभवं, स्थंभतीर्थाधिदेवम् ।।१।।
पूर्णीकृत्याऽगणितगुण सद्-धैर्य-गम्भीरतां ये,
चूर्णीकृत्याचलपृथुमहा - पापपृथ्वीधरं ये ।
कर्णीकृत्याखिलजिनवरो-क्ताऽऽगमान् सर्वथा ये,
स्वर्गं याता, अतुलबलिनः, प्रेमसूरीश्वरा ये ।।२।।
तेषां शेष-स्खलितमतिनां, लेशतोऽशेषभावैस्-
तत्प्रेमार्द्रस्तनुमतिरहं, सर्वकर्मक्षयाय ।
कर्तुं काङ्क्षे, शतकमतिसद्-भावभक्त्या विशिष्टं,
विद्वद्रम्यं, यतितति-पतिप्रेमसूरीश्वराणाम् ।।३।।(युग्म)
क्वाहं पङ्गुः, क्व च गुणगण-प्रौढिमान् प्रेमसूरिः,
क्वाहं बिन्दुः, क्व च गुणगणाऽपारवार्शुद्धसिन्धुः।
आशङ्का मे, मनसि नितराम्, प्रागतः किं विधेयम् ?
किं नादर्शः, स्वतनुतनुना, सूर्यबिम्बं बिभर्ति ।।४।।

---

* पू.आ.श्री विजयरामचन्द्रसूरिसाम्राज्यवर्ती ।

नत्वा नत्वा, गुरुवरपदान्, वन्दनीयान् सदैव,

स्मृत्वा स्मृत्वा, महिममहितं, नाम सारस्वतं सद्।

धृत्वा धृत्वा, गरिमगुणिनः, सद्गुरोर् धैर्यवन्तो,

वाचां पारे, गुरुगुरुगुणान्, गोचरीकर्तुमीहे ।।५।।

**यः** सर्वेषां, प्रियतम इव, प्रीतिकर्ता मुनीनाम्,

**यं** सेवन्तेऽखिलमुनिवराः, स्वाश्रयं मन्यमानाः ।

**येन** प्राप्तः, परमपुरुष-श्रेणिमध्येऽवकायो

**यस्मै** सर्वः, प्रणमति सदा, स्तौति सद्भक्तिभावात् ।।६।।

**यस्मात्** प्राप्तं, प्रबुधपुरुषैः, कर्मसाहित्यशास्त्रम्,

**यस्य** स्वच्छः, श्रुतरतिमतिः, सद्गुणान्वेषिगच्छः।

**यस्मिन्** सुस्थोऽखिलगुणगणः, स्वाश्रयं मन्यमानः

स प्रेमात्मा, जयतु नितरां, प्रेमसूरिर् व्रतीशः ।।७।।

स्वस्ति श्रीमान्, प्रथितपृथुता-प्राप्तपूर्णप्रतिष्ठः

शैलाश्लिष्टो, गहनगहनः, सत्सरित्संयुतश्च।

सिन्धु-र्बिन्दोः, पतिरनुदिनं, प्रोच्छलत्युल्लसन् सः ,

शास्त्युच्चैः सोऽमरगिरिसमो, भारताख्यप्रदेशः ।।८।।

यस्मिन्नाना-विधविधिकृताऽऽचार वैशिष्ट्यशिष्टाः

संतुष्टा श्च, सहजसुभगाः पुण्यकर्मप्रविष्टाः ।

लोकव्याप्ता, ललितललनाऽलङ्कृता लब्धलाभा,

दृश्यन्ते सन्नयचययुता, नैकदेशाः सुदृश्याः ।।९।।

एकस्तावत्, परमजनसत्पादपद्मैः पवित्रो,

हेयाहेयप्रथितसुपृथग्-भावसद्भावभव्यः ।

श्रद्धाशुद्धा-नुपममहिमाऽश्लिष्टतीर्थप्रदेशो,

भात्यत्यन्तं, भुवि दिदिविवत्, गूर्जरो नाम देशः ।।१०।।

देशे यस्मिन्, रुचिररुचिमत्, चित्तचिन्तापहारि,

चङ्गोतुङ्गाः, प्रवरशिखरा, नैकतीर्था विभान्ति ।

धर्मागारा, व्रतिततियुताः, कर्ममर्मापहाराः,

संराजन्ते, प्रवरजनताः, शुद्धबुद्ध्या विशुद्ध्या ।।११।।

अन्यश्चान्योपमितिवियुतो, वृक्षमालाविशालो,

वर्षापूर्णो, विभवभवनः, शोभनो भद्रभावः ।
दुष्टानिष्टप्रदलनपरो, वर्यदाक्षिण्यपुण्यो,
दक्षः कक्षी-कृतगुणगणः, सन् महाराष्ट्रदेशः ।।१२।।
कुम्भोजाख्यो, गिरिवरवरः, सिद्धशैलायतेऽस्मिन्,
गोदावर्या, विमलसलिला, स्वर्गगङ्गायतेऽस्मिन् ।
लक्ष्मीः पौरैः, सह सहजतो, भृत्यकृत्यायतेऽ स्मिन्,
विद्या हृद्या, [1]सुरधुनिरिवोत्कर्षवर्षः स देशः ।।१३।।
यत्रानन्ता, परममुनयः, सिद्धिसिद्धिं समापुः,
स श्री सिद्धा-चलगिरिवरो, यत्र चित्रीयमाणः।
अन्ये नैके, प्रवरगिरयो, यत्र तं तीर्थपीठं,
तार्तीयीकं, सहजसुभगं, स्तौमि सौराष्ट्रदेशम् ।।१४।।
पौरा यस्मिन्, मधुरगिरया, स्नेहतः संवदन्ति,
सौधा यस्मिन्, पवनपथमा-स्प्रष्टुकामा विभान्ति।
सच्चारित्रं, स्फुरति सकलाः, सत्कला संलसन्ति,
सौराष्ट्रोऽयं, जयतु नितरां, शौर्यवीर्याढ्यदेशः ।।१५।।
यः सर्वेषां, सहजरमणः, शौर्यसौन्दर्यबद्धः,
पादद्वन्द्वैः, परमपरुषा, यं पवित्रं प्रचक्रुः।
येनानेकं, तरणतरणम्, रक्षितं तीर्थवृन्दं,
यस्मै सर्वार्पितसुमनसो, यत्र वास्तव्यलोकाः ।।१६।।
यस्मान्नैके, महितमहसः, सन्महान्तश्च जाता
यस्य ख्याति, -र्दिशिविदिशि वै, विस्तृता संस्तवेन।
यस्मिन् बुद्धि-र्विपुलविशदा, सर्वदा सर्वदात्री,
देशेऽशेषे, सुभगसुभगः, सोऽस्ति देशो मरुश्च ।।१७।। (युग्म)
देशाद्देशात्, सकलविभवं, स्वीयदेशे निधातुं,
सज्जीभूता, इव खलु महा-साहसाः सज्जना ये।
व्यापारार्थं, कुशलमतयो, दूरदेशेष्वटन्ति,
सिन्धोः पारे, परिकरयुताः, संवसन्ति स्म केचित् ।।१८।।
अर्हच्चैत्याभिनवसृजने, श्रावकैरत्र देशे,
कोटीकोटीकनकमणिनां, व्यय्यते राशिराशु।

१. देवनदी-गङ्गानदी।

आचार्याणां गणमगणितं संनिमन्त्र्य प्रतिष्ठा-
मन्त्रोच्चारैः सह सविधिना प्रक्रियन्ते प्रकामम् ।।१९।।

कल्याणानां, विलसति वने, विभ्रमालिविलासे,
देशे तस्मिन्, परमरमणं, नैव विस्मर्तुमिष्टम्।
पुष्टं पुण्यैः, प्रथितसुयशो, दोषमोषप्रतिष्ठम्,
पृथ्वीपीठं, प्रथयितुमलं, पिण्डवाडापुरं सत् ।।२०।।

श्रद्धाभाजः, पुरवरजना, नैकचैत्यालयाश्च,
धर्मागारा, धवलितगृह-श्रेणयो यत्र तत्र।
पौराः सर्वे, सुभगहृदयाः, पूजयन्ति [1]प्रभूत्का,
अर्हद्गानं, सुजनभजनाः, सद्विधत्तेऽग्रदानम् ।।२१।।

भक्तैर् भक्त्या-न्वितसुहृदयैः, स्वीयसम्पद्व्ययेन,
सृष्टं नव्यं, मुनिजनगण-ज्ञानसिद्धेर्निमित्तम्।
सूरिप्रेमा-भिधमतिशुभं, ज्ञानशालं विशालं,
सूरिप्रेम्णः, प्रवरमिति तद्, स्मारकं संविभाति ।।२२।।

गुर्वादेशं, निजशिरसि ये, संप्रधार्यात्र सम्यग्,
गन्तारश्च, ग्रथितयशसो, धर्ममार्गं विशेषम्।
नैके लक्षा-धिपतय इह, श्रेष्ठिनः श्रद्दधानाः,
स्वर्गे स्वर्गा-धिपतिततिवत्, सर्वतः शोभमानाः ।।२३।।

पुण्यश्रेणि-र्विलसति गृहे, यत्र धर्मप्रधाने,
धीरो वीरोऽतिशयगुणवान्, धैर्यगाम्भीर्यधारी।
सङ्घाग्रीयस्त्वरितमतितो, लब्धलोकप्रतिष्ठः
तत्र श्रेष्ठीसुभगभगवान्-दास नामा विभाति ।।२४।।

सौन्दर्यौजः, कलितवपुषा, पूर्णतेजस्विनी च,
नाम्ना प्रेम्णा, प्रियकृतिचणा, सुप्रिया कङ्कुदेवी ।
ज्योत्स्नाकल्पा, हिमरुचिरतः, शङ्करस्येव गौरी,
प्रद्युम्नस्य, प्रियरतिरिव, प्राप्तपुण्याऽस्ति तस्य ।।२५।।

स्वच्छक्षीरे, स्फुटितकमले, मानसे मानसौकाश्-
चक्राङ्गिण्या, रूचिररुचया, क्रीडयन् स्वेच्छयेव ।
भुञ्जानोऽसौ, सुधनधनिको, दिव्यभोगं स्वकीयं,

१. प्रभौ उत्का: उत्कण्ठिता:-प्रभूत्का:

कालः कुत्र, क्क च नहि हि तद्, जानते याति यातः ॥२६॥

वर्षे [1]द्योदिक्-निधिविधुमिते, वैक्रमीये वरेण्ये,
सत्ताराया:, बलवति बले, फाल्गुने सौम्यमासे।
शुद्धे योगे, परमपवने, पूर्णिमाया: प्रभाते,
हृष्टे तुष्टे, सति च सकले, स्वीयसंसर्गिवर्गे ॥२७॥

प्राप्ते काले, प्रसवनिकटा, पुण्यपुञ्जैकगर्भा,
देवी कङ्कुः, शशधरमुखं, पुत्ररत्नं प्रसूता।
पूर्वाऽपूर्वं, द्युतिगणयुतं, व्योमशोभं पतङ्गं,
प्रातः काले, जनयति जगद्-[2]दीप्रदीपं यथैव ॥२८॥

सर्वेषां हि, प्रियकृतिपर:, शास्त्ययं सौम्यबालो,
मत्वेत्येवं, स्वजनजनमा-मन्त्र्य मन्त्रप्रवादैः।
मात्रा पित्रा, सुविधिमवधिं, प्राप्य नाम्नो विधेश्च
संज्ञा तस्य, स्थितगुणगणा, स्थापिता प्रेमचन्द्रः ॥२९॥

पुत्रं प्रेक्ष्य, प्रतिदिनमुभौ, भद्रभावस्वभावा-
वानन्देते, शुचिशुचिवरं, तौ जनित्रीजनित्रौ।
किं नो सिन्धोः, पतिरतिशयं, पूर्णगम्भीरनादः
सिन्धुः सिन्धूद्भवमभिनवं, प्रेक्ष्य पूर्णायते स्म ॥३०॥

धर्मज्ञाने विशदधिषणो, बाल्यकालेऽप्यबाल:,
कौशल्यं च, व्यपहृतिमतौ, शल्यसंसर्गवर्जम् ।
शिक्षां शिक्षाप्रदगुरुजनाद्, बद्धकक्षः समस्तां,
स्वल्पैः कालैः, स्वमतिगतितः, प्राप्तवान् प्रेमचन्द्रः ॥३१॥

बाल्ये यस्य, प्रवररुचिता, सर्वदा धर्मकृत्ये,
नित्यं धर्म-श्रवणमनिशं, तन्निदिध्यासनं च ।
देवार्चासच्चरणसुगुरू-पासना पापभीतिः
शुद्धिः सर्वा, सुकृतिनिकरे, वर्धते धीश्च तस्य ॥३२॥

हर्षोत्कर्षो-ल्लसितमनसो-श्चित्रचारित्रयोश्च
पित्रोः पुत्रो, विशदनयनो, नेत्रपात्रं पवित्रः।
अङ्कादङ्कं, बहुपरिचरन्, क्रीडयन् क्रोडदेशे
मन्दं मन्दं, सकलकलया, वर्धते धामधामा ॥३३॥

---

१. १९४० वर्ष। २. भानुं।

नाना केलिं, विपरिकलयन्, केलिवेश्मन्यजस्रं,
कल्लोलानां, विकसति कला, तत्र कादम्बवच्च।
धूलीक्रीडाविगतसमये यौवनं प्राप्तवान् सः,
तद् वैराग्यं, वय इव सदा, मानसेऽवर्धताऽस्य ।।३४।।
यस्याभ्यासे, विलसति मनो, वैभवे वर्धमाने,
नीरात् क्षीरं, परिकरजने, यच्छमानेऽतिमानम्।
सर्वस्मिन् वै, भवति च सति, स्वानुकूले तथास्मिन्
संसारे नो, स्फुरति विरति-प्राप्तचित्तं यदीयम् ।।३५।।
आयु र्यस्या-ञ्जलिजलनिभं, निर्गलद् भात्यनित्यं,
लक्ष्मीरेनं, जलधिलहरी-लोललोला विभाति।
देहं गेहं शतशतरुजां, स्नेहगेहं कथं स्यात्
चिते तस्यास्खलितविरतेः, संसृतौ का रतिः स्यात् ।।३६।।
स्वान्तं ध्वान्त-व्रजविरहितं, मेध्यमेकान्तकान्तं
जैनेन्द्राणां, मतमभिगतं, यस्य विद्याऽनवद्यम्।
संक्रीडन् सत्सरसि, च सदा, मानसे मानसौकाः
दृष्टः केन, क्व परसरसि, क्रीडितः किं कदाचित् ।।३७।।
कुर्वन् पात्रे, रतिमरतिभाङ्, नेतरस्मिन् कदापि
धर्मस्नेहं, जगति वितरन्, स्वीयकुलप्रकाशी।
धूमस्नेहैः, खलु विरहितो, नव्यदीप्रप्रदीपस्
तेजोमात्रं, नहि निजकुलं, यः कलङ्कीचकार ।।३८।।
गात्रं यस्यास्त्यनुपमगुणं, पूर्णसौवर्णवर्णं,
तेजःपूर्णं, विशदवदनं, शारदेन्दूपमानम्।
नेत्रं लोकत्रयजनमनः-पावनं सौम्यपूर्णं,
श्रोत्रं शास्त्र-श्रवणकरणं, कारणं पुण्यराशेः ।।३९।।
गच्छन्तं तं, पथिपथगताक्षिद्वयं रम्यरुपं,
दृष्ट्वा दृष्ट्वा, विकचवदनं, कामरुपं कुमार्यः।
संमुह्यन्त्यो, सहसि सहसा संवदन्ति-स्म नित्यं
हस्तं बाला, स्वकविधिबत् का ग्रहिष्यत्यमुष्य ।।४०।।
विश्वश्लाध्यं, विशदवदनं, नन्दकन्दं निकामं,
दर्शं दर्शं, तरुणवयसि, स्वागतं संजगाद।

कान्ता कान्तं, विनयवचसौ-दार्यसौन्दर्यवर्या,

कन्या धन्या, धवलितगुणा, मार्गणायाङ्गजाया ।।४१।।

आकर्ण्येत्थं मधुरवचनं, स्माह कान्तः प्रियाया,

उद्भूतायाः, सुतपरिणये, विस्मृतेः संस्मृतिर्मे।

अल्पे काले, विशददिनमन्वेष्य कार्यं करिष्ये

कः स्यात् मूर्खो, निजकुलकलां, नाशयेदुल्लसन्तीम् ।।४२।।

सत्यः सन्त्य-ग्रिमगुणगणाः, स्नेहदेहाः समुत्काः,

श्रेष्ठाः श्रेष्ठया-लयवलयवा-सिन्यभिज्ञाः कुमार्यः,

पाणिं प्राप्तुं, प्रवररुचयश्चावयोरात्मजस्य।

श्लाघ्यं भाग्यं, भुवि विजयते, नात्र सन्देहलेशः ।।४३।।

उद्वाहं मे, रहसि पितरौ, चिन्तयन्तौ विचिन्त्य

संसारार्तो, भवभवनभीश्चिन्तयामास चित्ते।

संसारेऽस्मिन्, निखिलसुषमं, दुःषमैरन्वितं यद्,

निर्बन्धोऽहं, परिणयवृतौ, बन्धयेयं कथं माम् ।।४४।।

इच्छैवं मे, सकलबलमा-लम्ब्य नान विलम्बं

सर्वानात्मक्षितिपतिरिपून्, सत्वरं संविभेद्य।

स्वात्मक्षोणेर्जितपरजनोऽजेय्यसंम्राड्भवेयं

मध्ये विघ्नं क्व च महदहोऽयाच्य तं नाशयिष्ये ।।४५।।

पित्रा प्रेम्णा, कथितमथ तं, पुत्रमाहूय चेत्थं

पुत्र! त्वं भो!, कुलदिनकरो, दिव्यतेजाः प्रियो मे।

वाणिज्ये स्यात्, तव यदि रुचिस्त्वां नियोक्तुं ममेच्छा

वाणिज्यं ही, सकलकुशला-वासमत्र प्रधानम् ।।४६।।

विघ्नव्रातप्रचुरपुरतः, प्रेमचन्द्रः स्वपित्रो-

राज्ञाऽवज्ञा, भवति महतां, पापकृत् स विचार्य।

व्यापारार्थं, विरतिविरतः, सञ्जगे सोऽप्यनिच्छन्

व्याराग्रामं, व्यवहृतिपरं, स्वीयपित्रा सहैव ।।४७।।

जातोत्कण्ठा, स्वहृदि वसतस्तस्य तत्रान्यदैका,

तीर्थाधीशं, प्रवरशिखरं, सिद्धशैलं विशालम्।

आश्लेष्टुं वा, सहजरुचिकृन्नाभिजातं जिनेशं,

जातोत्कण्ठा, नहि विषहते केऽपि कालप्रतीक्षाम् ।।४८।।

स्वस्वान्तेष्टं, सफलमखिलं, कर्तुकामो विपश्चित्,

कालं कार्या-तिशयकुशलं, प्रावलम्ब्याविलम्बम्।

निर्गत्यैव, स्वकनिलयत:, केनचित् सार्द्धमुर्ध्वं;

सिद्धिक्षेत्रं, परमपददं, प्राप पुण्यातिपुण्यम् ।।४९।।

सत्शैलेशं, शिशिरसमिरं, स्पर्शभव्यत्वदर्शं,

स्वैरं स्वैरं दुरितदलमुद्दालयश्चारुरोह।

दर्शं दर्शं, निखिलसुखदं, मोक्षनि:श्रेणिमेवं

हर्षोत्कर्षं, निरवधिमगात्, भक्तिसंसक्तचेता: ।।५०।।

# रामचन्द्रं गुरुराजं शरणं तं श्रये

- *आचार्यश्रीविजयतपोरत्नसूरिः

(लयः प्रीतलडी बंधाणी रे अजित...)

शास्त्रनिदर्शितसत्पथविहरणनिश्चयात्, भयसहस्रैर्युक्तिशतैरपि केनचित् ।
न सत्त्वसारः शक्यश्चालयितुं प्रभुः, रामचन्द्रं गुरुराजं शरणं तं श्रये ।।१।।

यत्करुणारसलीना यतयो लीलया, गहनसमयगूढार्थनिरूपणकौशलम् ।
आशु लभन्ते नामस्मरणाद् मर्मगं, उपकारिवरो वस्याः सततं मानसे ।।२।।

स्मारण-वारण-चोदनरूपविधित्रयम्, कर्णप्रिय-सम-कर्कशवचनमयं तथा ।
प्रतिचोदनमनुवर्तन-सबल-विरुद्धिकम्, चत्वार्यपि भगवंस्! त्वयि राजन्ते प्रभो !।।३।।

अनवगणयतामागो बहुलानामपि, नोपालम्भनरूपाच्चोदनतोऽन्तरा ।
प्रतिचोदनमिह शरणं शास्त्रेभ्यो विना, सकलसमीहितकल्पतरुभ्यः संभवि ।।४।।

चोदनतश्चेत् स्यात् समदोषनिराकृतिः, किं कुर्वीताऽध्ययनं शास्त्राणां तदा?।
अत एव त्वं शतशो हितशिक्षां ददत्, स्वाध्यायरसं प्रादुष्कर्तुमनायसे ।।५।।

किं वरयशसा ख्यातः सत्पुरुषाग्रणीः, कीर्तिरमाप्रियरमणः सौभाग्याम्बुधिः ।
असत्प्रवृत्तिं स्वसुतं शृण्वन्तं पिता, कोऽप्यविलम्बादाज्ञातो निरकासयत्? ।।६।।

---

* पू.आ.श्री विजयरामचन्द्रसूरिसाम्राज्यवर्ती ।

नहि चेत्, निखिलाश्रितहितलक्ष्याङ्कः सदा, सार्वजनीनः करुणारसनिष्यन्दनः ।
मलसम्मार्जनसक्षमवात्सल्याम्बुदः, परमपितामहतायाः शोभाकारणम् ॥७॥

गुरुदेवस्त्वं पापं मादृशमप्यहो, निश्रायां चेत् स्वस्य रक्षसि पावनः ।
योग्यतया मादृक्षु हि भवितव्यं खलु, संगृह्णाति न मृतकं गम्भीरोऽम्बुधिः ॥८॥

सम्प्रति गुरवो निर्मलशीलसुगन्धयः, मार्गनिरूपणतात्त्विकसात्त्विकताधिपाः।
आश्रितचित्ताऽऽवर्जनकौशल्यान्विताः, मृग्यन्ते शिवसाधनसोत्साहैर्जनैः ॥९॥

एतन्निष्ठात्रयसंरक्षायां त्वया, भवभीतेन न भगवन्! भीतिर्धार्यते ।
एकोऽपि त्रय इति संचिन्त्य समाश्रिताः, भूरिबुद्धिशुचिचरितास्त्वां शरणं यताः ॥१०॥

आधारो गुरुतत्त्वस्यैकः प्रापि मे, निर्धारो गुरुचरणे सर्वस्यार्पणे ।
उद्धारो गुरुवचनैर्भूयाद् दोषिणाम्, अवधारो गुरुभक्तानां मम प्रेयसाम् ॥११॥

# श्रीरामचन्द्रीयमहाकाव्यम्

(पञ्चमः सर्गः)

-*पंन्यासश्री मोक्षरतिविजयगणिः

सुभाग्य-सौभाग्यनिधिः शमावधिः, स एकदा सद्गुणवारिधिः सुधीः ।
गुरूत्तमेनादिमकालिकागमं[१], प्रभाषमाणेन मुदाभ्यभाष्यत ।।१।। ।।वंशस्थम्।।

जिनागमाम्भोनिधिपारगामिना, विमुक्तिकान्ताहृदयैककामिना ।
प्रकाममीहे यदतःपरं त्वया, विनीत लोकम्पृणवाणिनोच्यताम् ।।२।। ।। (युग्मम्)

उवाच वाचंयमयामिनीप्रभुः[२], प्रभुं सुधासारमिवोत्किरन् गिरम् ।
प्रमाणमाज्ञा भवतः प्रभोरिति, प्रणम्य पादाम्बुजयामलं प्रभोः ।।३।।

अवोचत प्रेमगुरुः प्रसन्नता,-परीतचेता विनयान्मुनेरिति ।
विमुक्तिरामाभविकात्मसङ्गमे, सुशिष्य! सांवत्सररूपमाप्नुहि ।।४।।

तदोत्तराण्यध्ययनानि पर्षदि, प्रभाषमाणं तमृषिप्रभाकरम् ।
विलोक्य चित्ते कुरुते वितर्कितं, बहुश्रुतः श्रोतृजनः शनैरिति ।।५।।

कलेः शनैः प्रस्फुरतः प्रभावतो, निमज्जदज्ञानपयोनिधौ जगद् ।
दयालुरुद्धर्तुमनाः किमाययौ, भुवीह पुंरूपवती सरस्वती ।।६।।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्ति ।

१. उत्तराध्ययननामानं। २. मुनिचन्द्रमाः।

किमागमोपांशु[१] विवक्षुरैत् स्वयं, कृपालुरेषोऽभयदेवसूरिपः ।
दयाङ्कुरान् वर्द्धयितुं स्वरोपितान्, प्रभुर्नु हेमादिमचन्द्र[२] आगतः ॥७॥

सुरान् किमध्याप्य दिवः समागमन्,-नरानिहाध्यापयितुं बृहस्पतिः ।
ध्रुवं वचोलब्धिनिधिर्जिनोत्तमै,-र्विदेहतः प्रेषित एष संयतः ॥८॥(कलापकम्)

प्रहर्षवर्षाम्बुपरीतहृत्सरः, स्वमश्रुपर्यूढदृशेव[३] दर्शयन् ।
जनाग्रणीगद्-गदवागवक् सभा,-समापने प्रेमयतीश्वरं प्रति ॥९॥

अतः परिस्मारितपूर्वसूरिधी,-प्रभावतः संयमभावितात्मनः ।
ध्रुवं विभो! श्रीजिनशासने मुनेर्महोदयः कश्चन संभविष्यति ॥१०॥

प्रभाव-पुण्योदय-पारदर्शिता,-ऽप्रमत्तता-प्रेम-परार्थपाटवम् ।
अनन्यसामान्यगुणश्रियाऽनया, विभाव्यतेऽयं जिनशासनाग्रणीः ॥११॥(विशेषकम्)

निशम्य सम्यक् तदिदं जनोदितं, गुरुर्जहर्ष प्रमदाब्धिमग्नहृद् ।
यथा रथाङ्गः कृकवाकुनिःस्वनं[४], यथा मयूरः स्तनयित्नुगर्जनम्[५] ॥१२॥

इतश्च मुम्बाभिधपुर्यभून्मुनिः, सुधारकेत्यार्हतलोकविश्रुतः ।
समानशीलैर्मुनिभिर्जनैश्च यः, प्रचारमुच्चैरकरोद्विचक्षणः ॥१३॥

तथाहि नोल्लेख इहागमेऽर्हतां, यदीक्ष्यते देवधनस्य कुत्रचिद् ।
निवास-रुग्णालय-शिक्षणालया,-दिनिर्मितौ तद्ध्युपयुज्यतां ततः ॥१४॥ (युग्मम्)

इदं समाकर्ण्य जनाननाद् वचः, सुधीशितुः श्रीकमलाह्वसूरिणः ।
अभून्मनः स्तम्भनतीर्थसंज्ञपू,-र्विराजमानस्य विचारणाकुलम् ॥१५॥

---

१. उपांशु=रहस्यम्। २. कलिकालसर्वज्ञः। ३. अश्रुपरिपूर्ण०। ४. कुक्कुटस्वरम्। ५. मेघनादम्।

ततः स तद्वाक्प्रतिकर्तुमुद्यतः, समाह्वयद् दानमुनिं स्वसन्निधौ ।
तदैत् सुधीः **सागरसूरिपोऽपि यत्, 'तदिष्टमासीदगदङ्करोदितम्'** ।।१६।।

त्रयोऽपि शिष्यादिभिरावृता बुधाः, समीक्ष्य शास्त्रप्रकरं विशेषतः ।
सुसङ्गतां देवधनोपयोगसं,-हितां हितां तत्समयोचितां व्यधुः ।।१७।।

विनिश्चिकायेति च तत्कृतित्रयं, विरोधनीया तदसद्विकल्पना ।
प्रभाषणीयं सततं च तत्कृते, स्थले स्थले शास्त्ररहस्यवेदिभिः ।।१८।।

ससङ्घ आनन्दसमुद्रसूरिपः, प्रयाति पादादिमलिप्तपूर्वराम् ।
यतस्ततस्तत्र स लब्धिसंज्ञकः, शमीह रामस्तु सुसंयमः सुवाक् ।।१९।।

अहम्मदाबादपुरीत्यमी त्रयः, स्थलेष्वमीषु त्रिषु बोधयन्तु नून् ।
प्रकासयन्तां सततं स्वसंहितां, तया च सत्यं जनतावबुध्यताम् ।।२०।।(विशेषकम्)

ततश्च निर्गत्य पुराद्वचस्विना,-महम्मदाबादपुरं ययौ प्रभुः ।
गुरोरनुज्ञां समवाप्य तेन च, प्रभाषिपार्श्वः प्रददौ स देशनाः ।।२१।।

न केवलं देवधनं हि रक्षितं, मतं जिनानामपि विस्तृतीकृतम् ।
प्रभाषणैस्तस्य वचः प्रभाविनः, **सतामहो कर्म फलत्यनेकधा** ।।२२।।

नवव्रतस्यातिलघुर् दशा[१] यतेस्,-तथापि तस्य प्रतिभा महीयसी ।
प्रसिद्धशब्दार्थगभीरिमान्विता, विवेचनाबालनृणां मनोहरा ।।२३।।

स कोऽपि षड्दर्शनबोध उद्धुरो, निरर्गला श्रोतृमनोऽनुयायिता ।
जनास्यजः पुष्पसुगन्धवद् ध्वनिर्-दिशोदिशं व्यानश एष तत्क्षणम् ।।२४।।(युग्मम्)

१. वयः । २. विजयानन्दसूरीश्वरस्य । ३. स्वर्गम् ।

कदाचिदानन्द[२]-गुरोर्गतस्य गां[३], तिथाविहासीत् परिषन्महीयसी ।
तदीयशिष्योत्तमहंस[१]-निश्रिता, तपोधनैर्बुद्धिधनैश्च संभृता ॥२५॥

निमन्त्रितः प्रेमगुरुः प्रयोजकैः, सहानुगः पर्षदमाययाविमाम् ।
उभौ निरीक्ष्य प्रयताविलातलं, प्रमार्ज्य चोपाविशतां यथाक्रमम् ॥२६॥

सभाग्रणीभाषणतः परं पुरि, श्रुताभिधो दैनिकपत्रतन्त्रभृत्।
जिनेन्दुसिद्धान्तविरुद्धाभाषणं, चकार मौनं[२] च मनोऽतिदुःखितम् ॥२७॥

अमुष्य वाचां प्रतिकारकारको, न दृश्यते कश्चिदिहेति चिन्तया ।
दिवेन्दुवन्म्लानमुखं सभाग्रणी,-मुवाच पङ्क्तौ चरमः शमीश्वरः ॥२८॥

प्रभो! निदेशो[३] यदि दीयते तदा, प्रतिप्रवच्मीदमधर्म्यभाषणम् ।
निशम्य वाचंयमवाचमाशु तां, मुनीन्दुमाजज्ञ इमं स मोदभाग् ॥२९॥(युग्मम्)

ततस्तदेकैकपदस्य खण्डनं, तथा च सिद्धान्तमतस्य मण्डनम् ।
यतीन्दुना युक्तिभिरुक्तिभिस्तथा, जिनागमानां सुदृढं समार्थ्यत ॥३०॥

अधार्मिकान्तःकरणानि पुस्फुटुस्-तदैव धर्मात्ममनोऽसुखैः समम् ।
अभून्मषीधौतमुखः स भाषकः, सभापतिः [४]फुल्ल-कजाननः पुनः ॥३१॥

जयारवः श्रीजिनशासनप्रभोः, प्रभोश्च रामस्य वचस्विनः क्रमाद् ।
दिवःपृथिव्योः प्रससार तत्परः, किमार्हतेभ्यः परिभाषितुं प्रियम् ॥३२॥

अथान्यदालोक्य पुरेऽन्नविक्रया-ऽऽलयान् शरारून्[५] भृशमार्यसंस्कृतिम्।
अकम्पतारं[६] कलिकालकालिम,-प्रसारमालोचयतो यतेर्मनः ॥३३॥

१. श्रीहंसविजयः। २. मुनीनामिदं मौनम्। ३. आज्ञा। ४. कजं कमलम् सहाऽलङ्काराऽलङ्कृतमेतत् पद्यम्-अमृत। ५. हिंसकान्। ६. अरं द्राक्।

अभक्ष्यभक्षं प्रति तत्परान् बहुञ्-जनानिहत्यानिव दुःखिनो दयी ।
व्यचिन्तयन् मोचयितुं ततो हि तान्, व्रतीशिता भावदयापरीतहृत् ।।३४।।

अथैतदर्थं स्म वचांसि वर्षति, प्रतिप्रतोलीव[१] सुधाः सुधानिधिः ।
गुरुप्रणुन्नः स सुधीगुरुर्-गिरां, गुरुं[२] गिरा जित्वरया विभूषितः ।।३५।।

इमे समे भोजनविक्रयालया[३], महान् कलङ्कः स्फुटमार्यसंस्कृतेः ।
सुधीभिरन्नस्य विसर्ग एव यन्न विक्रयः कर्हिचनापि सम्मतः ।।३६।।

कुतोऽपि चैतेन[४] कदापि शक्यते, कथं नु गन्तुं पथिकेन तान् प्रति ।
जनो यदार्योऽतिथिदेवताभवे,-तिसूक्तसूत्रं बहुमन्यते सदा ।।३७।।

तथैव ते भोजनविक्रयालया, न भक्षयन्तेऽनन्यदभक्ष्यभक्ष्यतः ।
जनेन तस्मात् स्पृहयालुनापुनर्भ-वं[५] विवर्ज्याऽवृषिणा विशेषतः ।।३८।।

विदन्ति तत् खादनखादका न यन्,-न केवलं भोजनमेव भुज्यते ।
इह [६]स्ववार्तं हितमात्मनः पुनः, परत्र चानेन सहैव किन्त्विति ।।३९।।

(पञ्चभिः कुलकम्)

जनप्रसिद्धो विषयस्त्वितः प्रभो,-रितः सुबोधं सरलं विवेचनम् ।
इदं सुवर्णे सुरभेर्निवेशनं, बभूव शङ्खे पयसः समुद्भवः ।।४०।।

न केवलं तेन जिनेन्द्रधर्मिणः, परन्तु जैनेतरधार्मिका अपि।
अलं बहूक्त्याशु समेऽपि नागराः, प्रभाषणेऽयुः किल वाग्वशीकृताः ।।४१।।

---

१. प्रतोली 'पाळ' इति भाषायाम्। २. गिरां गुरुं = बृहस्पतिम्। ३. 'होटल' इति आङ्ग्लभाषायाम्। ४. (आ+इ अदादिः+क्तः)- एतः, तेन (अमृत) एतेन आगतेन । ५. मोक्षम् । ६. स्वस्वास्थ्यम् ।

कुमुद्वतीवत् तिमिरारिरोचिषां, व्रतीशवाचां प्रथमप्रसारतः।
निमीलितास्तत्र पुरेऽचिरात् तदा, महत्तमा भोजनविक्रयालयाः ॥४२॥

ततश्च मुम्बाह्वयपुर्यपि प्रभा, प्रभाषणानां सरति स्म वित्प्रभोः ।
न वा तदाश्चर्यमहर्पतिद्युतिः, प्रयाति पारेभुवनं न किन्नु? ॥४३॥

विधायिनं ग्रीष्मऋतोरिव स्थिति,-च्छिदां मुनीनां गमनच्छिदां तदा ।
विलोक्य वर्षासमयं समागतं, गुरोर् निदेशेन यतिक्षितीश्वराः ॥४४॥

उपाश्रयणं श्राद्धकृतेन ते गता, महेन विद्यादिमशालिकाभिधम् ।
प्रवासिनः स्वं प्रति मन्दिरं यथा, नृपत्यनीकानि यथा निजं पुरम् ॥४५॥(युग्मम्)

दिशञ् जनाँस्तत्र च तत्त्वदेशनाः, स तं व्रतीन्दुर्गुरुणाश्रयत् सुखम् ।
गिरिं गिरीशो जलधिं जलेशयः, सरो यथा मानसमिष्टमानसः[१] ॥४६॥

पुरे यदाऽऽयान्ति दिना इहाऽऽश्विनाः[२], कृपालुपौरैरनुभूयते तदा।
अतीव दुःखं दिवसागमे सदा, चकोरबालैरिव कौशिकैरिव ॥४७॥

यतः सितायां दशमीतिथौ जना, इहैव मासे धृतधर्मिताञ्चलाः ।
बलिं ददन्ते पुरि भद्रकालिकाऽऽख्यदेवताया निलये पशोः[३] पशोः ॥४८॥

परन्तु तन्मन्दिरदेवलान्[४] प्रति-प्रवक्तुमासीन्नहि कश्चन क्षमः।
**बलेन हीनः क्रियतामभाषणं, विमुच्य किं वीर्यवति स्ववैरिणि** ॥४९॥

इतश्च तेषामशृणोद्दयोदितं, कृती कृपापूतहृदां कुतश्चन।
रुरोष चादोषबलस्य तत्पशोर्-बलिप्रदानाद्धृदये दयाधनः ॥५०॥

---

१. हिमालयगिरिं शङ्करः, समुद्रं विष्णुः, मानसं सरो हंसः। २. आश्विनमाससत्काः। ३. मेषस्य। (अजः स्यात् छगलः-..........पशुः॥ व्यभि.चि.१२७५) ४. देवलः पूजारीति गूर्जर्याम्।

चकार यावत्समयं विसर्जितुं, बलिप्रदानं प्रशमी विनिश्चयम् ।
**विचार्यते किं विदुषा बलाबलं, कदाप्यवश्यंकरणीयकर्मणि** ।।५१।।

ध्रुवं जनः श्रीजिनवाग्वशंवदः, सदैव सज्जः करुणाङ्गकर्मणि ।
मनः प्रियं कर्तुमना इवात्मनः, प्रियस्य नव्यप्रणया विलासिनी ।।५२।।

परन्तु जैना-ऽन्यजनस्य बोधये, क्रियेत किञ्चित् तदिहोत्तमं भवेत् ।
जनेऽपि सर्वत्र यतः समुच्यते, '**समुच्चयः साधयति प्रयोजनम्**' ।।५३।।

नरा यदार्या अनुकम्पया सदा, स्वभावतः किञ्चिदिवापि भाविताः ।
हृदि स्थितानुद्गमयामि जैनगीर्-जलेन सिञ्चन् करुणाङ्कुराँस्ततः ।।५४।।

शिनष्टि चार्वाग् दशमीतिथेर्दिना,-दनन्यपक्षस्तदरं समुद्यते ।
**यतस्तटाके स्फुटिते गते जले, कदापि पालिर्नहि बद्ध्यते यते!** ।।५५।।

इदं विचार्य व्रतिशीतदीधितिर्-निवेदयामास निजाशयं गुरुम् ।
निशम्य सोऽपि प्रशशंस वाग्मिनो, वचः स्वरूपं गुरुशिष्ययोरिदम् ।।५६।।

**पञ्चभिः कुलकम्**

उपादिशत् तत्पुरि स स्थले स्थले, यथा यथा सङ्कुलतां तथा तथा ।
सरांसि नीरैरिव मण्डपा नरै,-रयुर्दयाभिश्च पुरीजनाशयाः ।।५७।।

अनन्यसाधारणभाषणात् तथा,-ऽन्यदुर्लभादेयवचस्तया विभोः ।
दयां स्वहृद्यार्यजना न केवलं, परन्त्वहो म्लेच्छजना अपि न्यधुः ।।५८।।

विनैव यन्त्रं ध्वनिवृद्धिकारकं, प्रभाषमाणं प्रभुमुच्चकैः स्वरम् ।
परःसहस्राः प्रतिवासरं नरा, न्यशामयन् काममनन्यवृत्तयः ।।५९।।

प्रभाव आविर्भवति प्रवर्द्धते, प्रयाति पारेनगरं प्रभोररम् ।
प्रभा इव प्राग्गिरि[१]-मौलिवर्तिनः, प्रभावतः संप्रसरन्ति सर्वतः ।।६०।।

यथा यथा सा दशमीतिथिः सिता, समेति बाढं निकटं तथा तथा ।
बभूव चर्चाविषयो गृहे गृहे, पुरेऽत्र जीव-व्यपरोपणप्रथा ।।६१।।

यदा च लक्षार्धमिता जनाः पुरः, स्थले प्रसिद्धे[२] प्रभुभाषणेऽमिलन् ।
तदा स्म रिक्तीभवतीव भासते, पुरं समाक्रान्तमिवारिभूभृता ।।६२।।

अपूर्वमुज्जागरणं पुरीनृणा,-मिमं निशम्याहित[३]-भञ्जनाग्रणीः ।
जनाग्रणीजातमुपाश्रये स्वयं, समागतं शास्तितरामिति प्रभुः ।।६३।।

प्रयात तन्मन्दिरदेवलान् बुधा, बलिप्रथासंवरणाय सादरम् ।
हितोक्तिभिर्बोधयतापरैः कृतं, समैरुपायैर्यदि साम साधकम् ।।६४।। (युग्मम्)

सुधीरुपायानपरानपीश्वरान्, स्वकार्यसिद्ध्यै समसूचयन्नरान् ।
इमाँश्च मन्त्राक्षरवन्निधाय ते, हृदि प्रयाता नतमौलयो गृहम् ।।६५।।

ततश्च तैर्मन्दिरदेवला मुहुः, प्रबोधिता अप्यवमेनिरे हि तान् ।
**[३]असद्ग्रहं बोधयितुं नहि क्षमो, [४]बुधोऽपि साक्षान्मनुजस्य का कथा?**।।६६।।

त एवमेतैर्बहुशोऽपि सज्जनै,-रुपोपदिष्टाः प्रशमोक्तिभिः परम् ।
न दुद्रुवुर्वर्षुक[५]-वारिदैरपि, द्रवेत् कदाचित् किमु मुद्रशैलकः ? ।।६७।।

तथापि यावन्नवमीतमी[६]-क्षयं, कृताः प्रयासा विविधाः पुरीजनैः ।
अलम्बभूवुर्नहि किन्तु ते ततः, स्वकीयकृत्यं किल तैर्विनिश्चितम् ।।६८।।

१. सूर्यस्य । २. माणेकनाम्नि चत्वरे । ३. अहितं पापम् । ४. असद् ग्रहो यस्येति विग्रहः।
५. ब्रह्मा। ६. वर्षुकः वर्षणशीलः । ७. तमी रात्रिः।

अहम्मदाबादपुरे तमस्विनी-समापने तन्नवमीतिथेरथ ।
अभूतपूर्वो हि दिवोदयोदयो[१], [२]दयोदयोऽप्याविरभूज्जनाशये ।।६९।।

बलिप्रदानावसरेऽथ मन्दिरा-ऽङ्गणेऽगणेयाः[३] करुणाह्रदीश्वराः ।
जनाः समेता इव पुष्पदन्तयोः, पथः[४] कथञ्चिद् भुवि तारकाश्च्युताः।।७०।।

'बलिप्रथां संवरयन्तु देवला, बलिप्रथां संवरयन्तु देवलाः' ।
तदैवमुच्चैर्जुघुषुस्तरां पुरी,-जना-ऽऽनना-ऽन्तःकरणानि सन्ततम् ।।७१।।

विदारयन्तं किमिव द्युमण्डलं[५],जनध्वनिं तं विनिशम्य देवलाः ।
विमूढताशून्यहृदः कथञ्चन, क्षणेन निर्णीन्युरिदं परस्परम् ।।७२।।

समाप्नुमश्चेन्न वयं स्वयं बलि,-प्रदानमस्य च्छगलस्य तर्ह्ययम् ।
ध्रुवं न एवाद्य नितान्तकोपितो, जनोऽबलीकृत्य बलीकरिष्यति ।।७३।। (युग्मम्)

ततो बहिर्मन्दिरमेत्य तैर्द्रुतं, बलिप्रथासंवरणं प्रघोषितम् ।
जनैर्नितान्तं मुदितैः पुनः पुनर्-द[६]या-दयादायकयोर्जयः पुनः[७] ।।७४।।

मुदा जनानाममृतोद्भवायितं[८], जयारवैरम्बुधिगर्जितायितम् ।
इतीक्ष्यते तत्पुरि सर्वतो जलो-दयोऽ-[९]जलानामुदये तदद्भुतम् ।।७५।।

ततश्च निश्चिक्युरिमे परस्परं, यदस्य यात्रा विजयस्य तं पशुम् ।
बलिं पुरस्कृत्य पुरः स्थले स्थले, प्रयोजनीया [१०]जितकाशिराजवत् ।।७६।।

ततश्च निर्गत्य यतिक्षितिक्षितं, दयोपदेष्टारमयुः स्फुरन्मुदः ।
न विस्मरन्त्यार्यजनाः स्वजीवित,-व्ययक्षणेऽपि स्वमहोपकारिणम् ।।७७।।

१. प्रभातोदयः। २. दयाधर्मस्योदयः । ३. अगण्याः । ४. पुष्पदन्तयोः पथः = नभसः ।
५. द्यौराकाशः । ६. दयाधर्मः दयाधर्मदायकश्च तौ। ७. जनैःपुनरिति संबन्धः । ८. समुद्र इव आचर्यते स्म। ९. अजडानाम्, डकारलकारयोरैक्यादियं घटना । १०.जयेन राजमानः जितकाशी ।

जयस्य वार्ता विभुकर्णमागता, यतोऽधिरूढेव पुरैव मारुतम् ।
जना विनेया इव तत् तमभ्यधु,-र्जयाभियात्राग्रसरो भव प्रभो! ॥७८॥

उवाच वाचंयमसत्तमस्तु यन्-ममाद्य कर्तव्यमभूत् फलेग्रहि ।
विनापि मां तज्जययात्रयानया, विदन्त्वहिंसाविजयं दिशोऽपि हि ॥७९॥

निशम्य साम्यस्ववच: प्रभाविता, विभावयामासुरमी पुरीजना: ।
चमत्करोति प्रसभं मनांस्यहो, निरीहता-ऽस्य स्मयविस्मयावहा ॥८०॥

सदैव लोकोत्तरसद्गुणावली,-सुसेविपार्श्वा यदमी दमीश्वरा:।
अतीवरक्ता: करणीयकर्मणि, स्वयं विरक्ता यशसस्-तदुत्थितात् ॥८१॥ (युग्मम्)

इति ध्यात्वा नत्वा विरतिरतिमेतं व्रतिवरं, जनैर्यात्रारम्भि प्रसृमरमुदामोदमुदितै:।
मुनि: सामर्थेय: स्वगुरुपदपाथोजयुगल,-श्रित: प्राग्वत् तीव्रं स्म भवति तप:सूद्यतमति: ॥
॥८२॥ (शिखरिणी)

स भद्रकालीनिलयस्तदादि, [1]बल्यस्रसंस्पर्शविनाकृत: सदा।
यशोऽस्य गायन्निव राजति व्रती,-श्वरस्य घण्टारवकैतवेन । ॥८३॥ (उपजाति:)

इति श्रीरामचन्द्रीयमहाकाव्ये तपागच्छीयविच्छिन्नसामाचारीसंरक्षक-सकलसङ्घहितवत्सल-भावदयापरिपूर्णहृदय-पूज्यपादाचार्यदेव-श्रीमद्विजयरामचन्द्रसूरीश्वरचरितवर्णनात्मके पञ्चम: सर्ग:॥

१. अस्रं शोणितम् ।

# सूरिरामचन्द्रवचनामृतम्

- *मुनिश्रीआत्मदर्शनविजयः

* आत्मानमुद्दिश्य यच्चिन्त्यते प्रोच्यतेऽनुष्ठीयते वा, तत् सर्वमध्यात्ममुच्यते ।।१।।

* आर्येषूत्तमो न कदापि परस्त्रियं प्रति दृष्टिपातमपि कुर्यात्। यतः सविकारदृष्टिपातेनापि सदाचारवृत्तौ व्यभिचारदोष आक्षिप्यते। तद्वत् श्रीजिनशासनमपि वक्ति यदुतानात्मपदार्थेषु ममत्त्वबुद्धिरपि अध्यात्मगुणेन सह व्यभिचरति; परपुद्गलसङ्गमात्रस्य वेश्यासङ्गतुल्यत्वादिति ।।२।।

* यद्यपि दोषाः पदे पदे जायन्ते, तथापि तत्शुद्धिभावस्तु आत्मनो मृदुत्वभावो न कदाप्युपेक्षणीयो भव्यैः ।।३।।

* पुण्योदयकाले प्राप्तेषु सुखेषु यो माद्यति स स्वहस्तेनैव दुर्गतिं निर्मापयति। प्राप्ताभिः सुमनुष्यत्वसुकुलत्वसुरुपत्वस्वायुषत्वप्रमुखसामग्रीभिः केवलमात्मगुणानां प्राप्त्यर्थमेव प्रवर्तितव्यमित्येतावदेव तासां सफलत्वम् ।।४।।

* सदाकालमात्माध्यवसायेष्वुपयुक्ततरं भाव्यमिति नामात्मानुप्रेक्षा। ''एतया प्रवृत्त्या मम को गुणविशेषः कर्मदोषो वा भविष्यति ?'' इति चिन्तनीयम्। ।।५।।

* इच्छानिरोध एव सदाचारस्य मूलमस्ति ।।६।।

* साधुना ''अहमणगार'' इति सर्वदोपयुक्तेन भाव्यम्। इदं रजोहरणं सर्वेषां विश्वासास्पदं वर्तते। एतद् युक्तो जीवो न चक्षुः-कर्ण-नासिका-जिह्वा-स्पर्शाऽक्षै-र्धर्मचौरो भवति ।।७।।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्ती ।

* संसारे सुखं विवेकजन्यमेव भवति, दु:खं चाविवेकजन्यमेव। स्वजीवितव्ये यद् यद् व्यतिकरं निर्माप्यते, तत्तदात्महितकरबुद्ध्यैव स्वीकरणीयम्, अयमेव विवेक उच्यते।।८।।

* य: स्वात्मनो मित्रं भवति, स जगतो मित्रं भवति। यस्तु स्वात्मन: शत्रुर्जायते, स जगतोऽपि शत्रुरेव ।।९।।

* अद्यावधि कषायपरिणतेन जीवेन स्वानिष्टं यादृक्प्रमाणं कृतं तन्नान्येन केनापि कृतम्। यदि चात्मा विवेकं प्राप्नुयात्, तर्हि न कोऽपि स्वात्मानं दु:खिनं विधातुं प्रभवेत् ।।१०।।

# श्री सूरिरामचन्द्रवचनामृतम्...

**- *अनुवादकर्त्री साध्वीजीश्रीश्रेयपूर्णाश्रीः**

अभूवन् अद्यावधि अनन्ता अनन्तोऽपकारिणोऽर्हत्परमात्मानः। विचरन्ति च साम्प्रतकाले महाविदेहादिक्षेत्रेषु विंशतिर्जिनेश्वराः। भविष्यन्ति चानागतकालेऽनन्तास् तीर्थंकराः।

सन्तत्यजुस् ते परमात्मानः प्राप्तसुखं। स्वीचक्रिरे स्वेच्छया दुःखानि तैः परमात्मभिः, मिथ्यात्वं वमित्वा सम्यक्त्वं प्राप्तम्। अविरतिं परिहृत्य विरतिधर्मोऽङ्गीकृतः। कषायान् निहत्य वीतरागता प्राप्ता। त्रिभिः योगैः विमुक्तास्सन्तः परमात्मपदं च प्राप्तवन्तः।

उपदिशन्ति च ते परमात्मानः - यत् जीवोऽनादिकालीनोऽस्ति। ततः तस्य संसारोऽपि अनादिकालीन एव। सत्संसारश्च कर्मसंयोगेनैव निर्मितः। तेनैव सरागादिरूपः संसारो दुःखस्वरूपो, दुःखदायको, दुःखपरंपरायाश्च सर्जकोऽस्ति।

"अयं संसारोऽसारः" यतः संसारस्य कोऽपि पर्यायो न स्थिरः। सांसारिकं सुखं क्षणभङ्गुरं, तुच्छं, पराधीनञ्च। तथापि जीवाः व्यक्तिषु-वस्तुषु वा यदिष्टत्वमनिष्टत्वं वा परिकल्पयन्ति। तत् सर्वं मतिकल्पनैव, न तु वास्तविकं। यतः तत् समस्तं कर्मणैव निर्मितमस्ति।

यदद्य इष्टं वर्तते, तदैकदिनान्तरं अनिष्टमपि भवितुं शक्नोति। यतः जीवानां इच्छाः परिवर्तन्ते, ततः यदिष्टमस्ति तस्योपरि रज्यन्ति, यच्चाऽनिष्टं तदुपरि द्विषन्ति। रागं द्वेषं च कृत्वा पापकर्माण्युपार्जयन्ति। जीवाश्च यद् दुःखमनुभवन्ति, तत् स्वपापकर्मफलविपाकमेव, तत् पापकर्मोपार्जनं जीवेन सुखभोगतः सुखरागतः क्रियते तद्रागश्च च शोभनं मत्वा क्रियते, तस्मात् संसारसुखमेवातिभयानकमस्ति।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्ती।

संसारसुखराग एव आत्मानं करोति हिंसाकारकं, असत्यवादिनं, अदत्ताऽऽदातारं, अनाचारिणं, लुण्टाकं, शठञ्च। एतादृशाः दोषाः जीवं कीदृशं पापं न कारयेत्? तत्कथयितुमपि न शक्यम्। तदेव समस्तदुःखानां मूलमस्ति।

कथ्यतेऽतश्च - भौतिकसुखाभिकाङ्क्षा भवेत्-तत् पापम्
तत्सुखमाप्तुं प्रयत्नकरणं-तत् पापम्
सुखाप्राप्तेः पश्चात्, यदानन्दानुभवनं-तत् पापम्
भोगे भुज्यमाने हर्षोत्कर्षः स्यात्-तत् पापम्
यदि सुखं नाशयेत्, तदाऽऽक्रन्दकरणं-तत् पापम्

जीवो धर्मात् सुखं प्राप्नोति। सुखे प्राप्ते सति पापमाचरति। पापात् दुःखं लभते...इत्येवं संसारपरिभ्रमणचक्रं चङ्क्रमते।

संसारस्य ईदृक्स्वरूपं जीवो ज्ञातुं शक्नोति, तस्मिन् प्रभावः मिथ्यात्वमहापापस्यैव। यत् सुखं प्रति रागः, दुःखं च प्रति द्वेषः, तदेव मिथ्यात्वं, तद-तिदुष्टमस्ति। संसारपरिभ्रमणस्य बीजञ्च अस्ति।

मिथ्यात्वं यावन्न ज्ञायते, त्यक्तुं च न प्रयत्यते, तावत् प्रभूतधर्माचरणे सत्यपि संसारपरिभ्रमणं न विरमति, तथा च पारमार्थिकश्रेयोऽपि न लभ्यते।

उक्तं च = मिथ्यात्वं परमो रोगो, मिथ्यात्वं परमं तमः।
मिथ्यात्वं परमः शत्रुर्, मिथ्यात्वं परमं विषम् ।।

श्री अर्हत्परमात्मानः प्रथमो हितोपदेशोऽस्ति-यत्

(१) संसारसुखं त्याज्यमेव (२) दुःखं सहितव्यमेव (३) दुःखं प्रति द्वेषो भवेत्-सा जीवमूढता (४) सुखं प्रति रागः स्यात्-सा जीवस्य महामूढता (५) सुखरागं प्रति द्वेषः, दुःखद्वेषं प्रति च रागः, तदेव हि धर्ममूलम्।

संसारस्य प्रत्येकसुखमुपाधिजन्यमस्ति। तस्य मूलं जीवस्य शरीरबन्धनमस्ति।

यदि जीव इच्छेत् तर्ह्यपि सुखप्राप्तिर्न स्यात्। यदि नेच्छेत्, तर्ह्यपि दुःखशतानि आपतन्ति। जीवः सुखलिप्सया प्रवर्तते, यदा च सुखं लभते, तदा नवा विपदुद्भवति। एकेच्छा पूर्येत, तदा द्वितीयोद्भवति।

शरीरं कियदपि साधु भवेत्, तथापि जरोमरणमागमिष्यतः, यतोऽस्ति "सर्वं क्षणिकं जगत्"।

समस्तात्मानां परमादर्शः-सदा स्वाधीनतया सुखपूर्वकं जीवनमस्ति। यदा जीवोऽशरीरिपदं प्राप्नुयात्, ईदृशी च दशा तदैव भवेत्।

यावत् शरीरमस्ति तावत् जन्ममरणरूपः संसारोऽस्ति। इदं शरीरस्य मूलं कर्म आत्मानं संश्लिष्टमस्ति। ततः कर्मनिर्जरणार्थं प्रयतितव्यम्। तदर्थं च श्रेष्ठसाधना मनुष्यभवैव

सुलभा। सम्यग्दर्शन-ज्ञान-चारित्ररत्नत्रय्या: साधनैव मनुष्यजन्मनस्सफलतास्ति। इति श्रीअर्हत्परमात्मान उपदिशन्ति।

अस्य संसारस्य या सामग्री प्राप्ता, सा अल्पा वा, बहु वा, शोभना वा, अशोभना वा-अस्ति, इदं न महत्त्वपूर्णं, किंतु अस्या: कारणात् मम आत्मश्रेयस्साधना न विरमेत् इति सततं ध्यानं, तद् महत्त्वपूर्णम्।

जीवस्य सर्वाधिको रागश् शरीरोपरि भवति। तस्य च मूलं 'कर्म', तद् विनाशयितुं जिनाज्ञापूर्वकं शरीरस्य कष्टं दत्त्वा, तस्य रागं त्यजेत्।

यदा मिथ्यात्वं नश्यति, तदा विषयान् प्रति विराग: प्रकटीभवेत्। संसारसुखस्य त्यागो भवेत्, रागद्वेषाभ्याम् रक्षणं भवेत्, कषायेभ्य: मुक्ति: संभवेत्। परमात्मदशा च प्राप्यते।

संसारस्य किमपि सुखं न सदाकालं तिष्ठति। परपीडां विना संसारसुखं नानुभूयते।

मन-वचन-काययोगा: जीवं यावद् विलग्ना:, तावत् कर्म बद्ध्यते। तस्मात् कुशलानुबन्धायै एक: प्रयत्न: कर्तव्य:।

तद् अस्मिन् जगति प्रकृष्टालम्बनानिर्थं, श्रीअर्हत्परमात्मान: सन्ति। तेषा माज्ञाराधनया मनस: प्रसन्नता भवेत्। समाधि र्मोक्षप्राप्तिश्च शक्या।

* दु:खं दुष्कृतसंक्षयाय महतां, क्षान्ते: पदं वैरिण:,
कायस्याशुचिता विरागपदवी, संवेरगहेतुर्जरा ।।
सर्वत्यागमहोत्सवाय मरणं, जाति: सुहृत्प्रीतये ।
संपद्भि: परिपूरितं जगदिदं, स्थानं विपत्ते: कुत: ।। - श्री वस्तुपाल मंत्रीश्वर:

संसारस्य कस्यापि सुखस्यानुभूतिर्लेशमातो भवति, साऽप्य अल्पकालीना, जीवञ्चातृप्तिदायिका एव। तस्या: सुखानुभूत्या: पूर्वं तद्वियोगजं दु:खमनुभवितव्यमेव। दु:खस्य तीव्रता यावत्यनल्पा तावत् सुखानुभवोऽनल्प:। तत्सुखस्याऽनुभूते: समये पारतन्त्र्यमत्यन्तम्, कियत्प्रकाराणि दु:खानि सहन्ते? तत्सुखसमाप्तिसमये प्रभूताऽपायानां भयं वर्तते। ईदृशं संसारसुखमस्ति। ईदृक्-सुखानामावश्यकता हि एकप्रकारिका व्याधिरस्ति। संसार ईदृक्व्याधिभि भृत:। तस्मिन् दु:खं विना न किमपि स्यात्।

जीवो यत्सुखमिच्छति, तत्सुखमशरीरिपदं विना न संभवति। अशरीरिभवितुं वीतरागेण भवितव्यमेव, वीतरागीभवितुं मोहो मारयितव्य एव।

अद्यावधि यत् शरीरं भोगायतनं जीवेन स्थापितं, मोहमारणार्थं तद् योगायतनं निर्मातव्यम्, तदर्थं भोगत्यागपूर्वकं, योगजीवनं जीवितव्यम्।

यज्जीवनमध्ये एकमपि पापकार्यं न स्यात्, एकोऽपि जीवो न पीड्येत, तदर्थं भोगास्त्याज्यास्सन्ति। भोगानां सर्वथा त्यागो यज्जीवने स्यात् तदेव जीवनं श्रेष्ठजीवनम्। भोगस्सर्वपापानाम्, दु:खानाञ्चाऽऽकरोऽस्ति।

# खण्ड–४
# अर्वाचीन कृतयः

"**श्री**" ति लक्ष्मीगुणैर्युक्तम्, बाह्याभ्यन्तरसुन्दरं ।
"**ने**"ति निःशेषभावाऽऽढ्यम्, निर्मलतागुणास्पदम् ।।१।।

"**श्रे**" श्रद्धा गुणसंयुक्तं, पुनश्श्रेयस्फलात्मकम् ।
"**य**" शब्दयतनाशुद्धं, यमादिभिरलङ्कृतम् ।।२।।

"**से**" ति समर्पणं सौम्यं, संतोषः समता सुधीः ।
सौजन्यं सुभगं स्वच्छं, "स" शब्दात् स्यात् शुभाश्रयः ।।३।।

"**मी**" ति मतिमुग्धतां मोहम्, मदनश्च मदं तथा।
ममत्वं मारयित्वाऽरं, स्यात् **श्रीनिःश्रेयसं** पदम् ।।४।।

–श्रीः

# कन्याप्रदाने सावधानः

- *आचार्यश्रीविजयकल्याणबोधिसूरिः

प्रायः सर्वयोरपि कन्यापित्रोः स्वकन्याया अनुरूपवरान्वेषणगोचरा चिन्ता भवति। **बलीयान् खल्वपत्यस्नेह** इति। न ह्यतोऽपि परोऽनर्थप्रपातः कन्यायाः, यद् दुष्टवरेण तस्या योजनम्। अतो यादृग्वराय कन्या न देया, तादृग्वरस्य विस्तृतं [1]वर्णनं शास्त्रेषूपलभ्यते, अत्र प्रस्तुतमस्ति तन्नवनीतम्।

**- स पुमान् यस्मै कन्या न देया -**

१) मूर्खः २) निर्द्धनः ३)दूरस्थः ४) शूरः ५) त्रिगुणाधिकवर्षः ६) अत्यद्भुतधनाढ्यः ७) अतिशीतः ८) अतिरोषी ९) अतिकामी १०) अतिलोभी ११) विकलाङ्गः १२) सरोगः १३) बधिरः १४) क्लीबः १५) मूकः १६) खञ्जः १७) अन्धः १८) जडचेता १९) सहसाघातकर्ता २०) दुष्कुल-जातिः २१) पितृमातृवियोगी २२) भार्यापुत्रयुक्तः २३) बहुवैरापवादः २४) सर्वदैवोत्पन्नभक्षी २५) आलष्यहतचित्तः २६) एकगोत्री २७) द्यूतचौर्यादिव्यसनी २८) मद्यमांसमत्स्यभोजी २९) अधार्मिकः ३०) दुराचारः एतद्विपरीताय तु सदाचार-दाक्षिण्य-दया-सन्तोष-कृतज्ञता-औचित्य-सद्बुद्ध्यादि गुणगणविभूषिताय सुशीलाय प्रियधर्माय वराय देया कन्या, एवमेव तत्सुखितासम्भवात्, अन्यथैव तन्नरकावतारयोगाच्चेति सूक्ष्ममीक्षणीयम्।

वदन्ति चात्र विज्ञाः -

कुलं च शीलं च सनाथता च, विद्या च वित्तं च वपुर्वयश्च।
वरे गुणाः सप्त विलोकनीयाः, ततः परं भाग्यवशा हि कन्या ।।इति।।

(सन्दर्भः-श्राद्धगुणविवरणग्रन्थः)

* पू.आ.श्री विजयभुवनभानुसूरिसमुदायवर्त्ती। १. सन्दर्भः।

# आगमस्यामृतम्

- *आचार्यश्रीविजयकल्याणबोधिसूरिः

अनादिकालीनप्रबलमोहविषविलुप्तचेतनस्यात्मनः परमभेषजं तत्त्वज्ञानापराभिधानममृतमेव। अद्य प्राभृतीक्रियतेऽनुपममेकं तत्त्वज्ञानं भगवदागमोदधेरुद्धृत्य-

**।। भेउरेसु ण रज्जेज्जा ।।**

(परमपावनं प्रथमागमस्वरूपं श्रीआचाराङ्गसूत्रम्)

भिदुरेष्विति नश्वरेषु, न रज्येतेति न लेशतोऽप्यनुरागं प्रपद्येत, नश्वरगोचरस्यानुरागस्य दुःखमात्रे पर्यवसानात्। न हि विनाश एव दुःखहेतुः, यत् किञ्चिद्विनाशभावेऽपि महात्मसु दुःखादर्शनात्, अपि तु तत्तद्वस्त्वनुराग एव, अतो हि क्लिश्यते जन्तुस्तत्तद्वस्तुसद्भावेऽपि, अनुरागस्य चिन्तादिसाचिव्यनियमात्, उक्तं च [ ]-

चिन्ता गते भवति साध्वसमन्तिकस्थे,
मुक्ते तु तप्तिरधिका रमितेऽप्यतृप्तिः।
द्वेषोऽन्यभाजि वशवर्त्तिनि दग्धमानः,
प्राप्तिः सुखस्य दयिते न कथञ्चिदस्ति।। ।।इति।।

न ह्यनुरागगोचरेऽत्यक्ते तत्त्यागः सङ्गतिमङ्गतीति विषयत्यागमेवोपदिशन्ति तत्त्वविदः, यथा-मुक्तिमिच्छसि चेत् तात! विषयान्, विषवत् त्यज। इति (अष्टावक्र गीतायाम्)

इत्थञ्च पर्यायशब्दा एव रागमुक्तिर्विषयमुक्तिश्चेति सूक्ष्ममीक्षणीयम्।

आत्मा खलु नित्यः, शश्वद्भवनात्, शस्त्राद्यगोचरत्वात्, यदाहुः पूर्वमहर्षयः-
नैनं छिन्दन्ति शस्त्राणि, नैनं दहति पावकः।
न चैनं क्लेदयत्यापो, न शोषयति मारुतः - (श्रीमद्भगवद्गीता )इति।

अतोऽयमेवानुरागमर्हति, न धनम्, न सौधः, न यानादिकम्, नापि शरीरम्, नश्वरत्वादेवेति शम्। (क्रमशः)

* पू.आ.श्री विजयभुवनभानुसूरिसमुदायवर्ती।

# चतुर्थीविभक्तिसन्दृब्ध-श्रीचारित्रसप्तविंशिका-७

- *मुनिश्री सम्यग्दर्शनविजयगणिः

**माङ्गल्यम्** ([1]स्रग्धरा)

ऐँन्द्राः सार्धं स्वऋध्या, मणिकटककरास्, तारहाराभिरामाः,
कान्त्या द्युत्या च धृत्या, सुरगणसहिताः, श्रेष्ठयानाऽऽरुढास्, ते।
मेरौ स्नानं प्रचक्रुर्, भवभयदलनं, पार्श्वपार्श्वस्य यस्य,
वन्दे तं पार्श्वनाथं, प्रवरगुणततिं, देहि मे देवदेव! ।।१।।

([2]भुजङ्गप्रयातम्)

नमस्ते चिदानन्दनित्योत्सवाय, नमस्ते स्वभावैकसाम्राज्यदाय ।
नमस्ते सदाचारविस्तारकाय, नमस्ते समस्ताय सत्संयमाय ।।२।।

नमस्ते सुभद्राय भद्रङ्कराय, नमस्ते नतानेकनागेश्वराय।
नमस्ते हतानेकदुर्भावनाय, नमस्ते समस्ताय सत्संयमाय ।।३।।

नमस्ते महायोगराजेश्वराय, नमस्ते निजानन्दसौख्यङ्कराय।
नमस्ते सदा शुद्धभावेश्वराय, नमस्ते समस्ताय सत्संयमाय ।।४।।

नमस्ते यथाख्यातशैलेश्वराय, नमस्ते शुभाचाररत्नाकराय।
नमस्ते सदा पापकर्मातिगाय, नमस्ते समस्ताय सत्संयमाय ।।५।।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्ती ।

१. म्रभ्नैर्यानां त्रयाणां, त्रिमुनियतियुता **स्रग्धरा** कीर्तितेयम्। न्यासः=SSS S।S S, ।। ।।।।S, S। SS ।SS = सप्तभिः सप्तभिर्यतिः ७+७+७ एकविंशत्यक्षरीयप्रकृतिजातौ स्रग्धरानामसमवृत्तम्। २. **भुजङ्ग-प्रयातम्**=भुजङ्गप्रयातं चतुर्भिर्यकारैः। न्यासः- ।SS ।SS, ।SS ।SS द्वादशाक्षरीय--जगतीजातौ भुजङ्गप्रयातं समवृत्तम्।

नमस्ते महामोहविध्वंसकाय, नमस्ते महादुष्टलोभाऽहिताय।
नमस्ते सदा क्रोधशत्रुञ्जयाय, नमस्ते समस्ताय सत्संयमाय ।।६।।

नमस्ते श्रुतज्ञानशुद्धात्मकाय, नमस्ते मुदा त्यागभावात्मकाय।
नमस्ते मृषावादमुक्तिप्रदाय, नमस्ते समस्ताय सत्संयमाय ।।७।।

नमस्तेऽसुखे दीनतादारकाय, नमस्ते भवावर्तनिर्मुक्तकाय।
नमस्ते सुखे लीनतानाशकाय, नमस्ते समस्ताय सत्संयमाय ।।८।।

नमस्ते जगज्जीवसन्मार्गदाय, नमस्ते शिवात्मैकसौख्यप्रदाय।
नमस्ते निरीहाविरक्तीश्वराय, नमस्ते समस्ताय सत्संयमाय ।।९।।

नमस्ते सुधासारसाम्यप्रदाय, नमस्ते क्षमाधारविश्वंभुवाय।
नमस्ते जगजन्तुनिस्तारणाय, नमस्ते समस्ताय सत्संयमाय ।।१०।।

नमस्ते पराऽपूर्व सत्पुण्यकाय, नमस्ते सुधर्मैकलब्धिप्रदाय।
नमस्ते दुराचारमुक्तिकराय, नमस्ते समस्ताय सत्संयमाय ।।११।।

(प्रमाणिका)

अगाधज्ञानमूर्त्तये, [1]गुणालिवृन्दजातये[2]।
भवारिनाशहेतये[3], नमोऽस्तु संयमाय मे ।।१२।।

भवाब्धिपारसेतवे, स्पृहानदीतपर्त्तवे[4]।
तमोविभेदपीतवे[5], नमोऽस्तु संयमाय मे ।।१३।।

क्रुधाग्निधूमयोनये[6], छलाहि-नागशत्रवे[7]।
मदाद्रिभेदवज्रिणे, नमोऽस्तु संयमाय मे ।।१४।।

मनोरथाब्ध्यगस्तये, स्मराऽऽजिशूरपत्तये।
सदात्मसाद्विरक्तये, नमोऽस्तु संयमाय मे ।।१५।।

कुकर्मपाशसञ्छिदे, कुमोहहस्तिसंभिदे।
अलोकलोकसंविदे, नमोऽस्तु संयमाय मे ।।१६।।

---

१. भ्रमरः २. जातिपुष्पम् ३. शस्त्रम् ४. ग्रीष्मर्त्तुः ५. सूर्यः ६. मेघः ७. गरुडः
* प्रमाणिकाजरौ लगौ। अष्टाक्षरीयानुष्टुब्जातौ प्रमाणिकानामसमवृत्तम्। न्यासः-।ऽ।ऽ।ऽ।ऽ

([1]अनुष्टुप्-त विपुला)

संस्तुताय स्वाहाशनैः शक्रौघैर्वन्दिताय च।
पूजिताय सन्मानवैः, चारित्राय नमोऽस्तु मे ॥१७॥

ज्ञानप्राप्त्यैकासङ्गिने, निरीहगुणवाहिने।
मनःसमीहापूरिणे, चारित्राय नमोऽस्तु मे ॥१८॥

जगज्जन्तुसद्बन्धवे, सद्गुणरत्नराशये।
पापघर्माऽम्भोदाय च, चारित्राय नमोस्तु मे ॥१९॥

सम्यग्ज्ञानसंयोजिने, मुक्ताय कर्मबन्धनैः,
साम्यमुक्तानां सूक्तये, चारित्राय नमोस्तु मे ॥२०॥

निसर्गकारुण्यालय-स्वभावैकनिवासिने।
परार्थपार्थभाय च, चारित्राय नमोस्तु मे ॥२१॥

([2]अनुष्टुप्-म विपुला)

नाशिने सन्तापौघानां भो!, दोषाजातनिष्काशिने।
वासिने च सद्भावानां, नमस्ते चरणाय मे ॥२२॥

रोषिणे मायाशाकिन्यां, कर्ममलापरोधिने।
मोषिणे संसारापत्तेर्, नमस्ते चरणाय मे ॥२३॥

बोधिने सद्भव्यानाञ्च, मोदिने सर्वजन्तुनाम्।
महाशोधिने पापानां, नमस्ते चरणाय मे ॥२४॥

शोषिणे कामानां तूर्णं, संवेगस्य च पोषिणे।
तोषिणे गुप्तिप्राप्तानां, नमस्ते चरणाय मे ॥२५॥

संसारापगातीर्थाय, मेरुतुल्यव्रतात्मने,
विज्ञात्रे सद्भावानाञ्च, नमस्ते चरणाय मे ॥२६॥

---

१. अष्टाक्षरीय-अनुष्टुब् जातौ-'त'विपुला-अर्धसमवृत्तम्, ''अनुष्टुभि नाद्यात् स्नौ-युजोः षड्भ्यो लो विपुला'' युजोः=समपादयो 'ओजे तुर्यान्न-त-भ्रर्मसास्तद्विपुला। ओजे-विषमपादयोः यदि प्रथम-तृतीयपादयोः तुर्यादक्षरात् त-गण स्तदा जातिपक्षे त-विपुला। यदि प्रथमे-तृतीये वा पादे तुर्यादक्षरात् त-गणस्तदा व्यक्तिपक्षे त-वि०। २.५. म-विपुलायाः लक्षणम् त-विपुलासमानम् नवरं विषमपादयोः तुर्यादक्षरात् म-गणश्चेत् तदा म-विपुला। जाति-व्यक्तिपक्षेऽपि।

(¹शिखरिणी)

विचित्रं सद्वर्णैर्, रचितमसमं, पद्यकमलम्,
शुभं शुभ्रं रम्यं, चरणगुणभृत्, साम्यगुणदम्।
हतं पापं सर्वं, भवभ्रमणकृत्, दुःखकरणम्,
वरं ''श्रेयो''लब्धं, परमसुखकृद्, ''दर्शन''करम् ।।२७।।

## लेखप्रेषकेभ्यो विज्ञप्तिः

* ''श्रीनिःश्रेयसम्''पत्राय प्रेषणीयलेखेषु लेखाः पृष्ठस्यैकपार्श्वे लेखनीया-ऽक्षरपङ्क्तिमध्ये व्यवधानमावश्यकम् उभयपार्श्वयोरपि रिक्तस्थानं रक्षणीयम्।

* स्वच्छाक्षरै र्लिखिता एव लेखाः प्रेषणीया अर्थाल्लेखेषु अक्षरस्वच्छताऽनिवार्या, अस्पष्टाऽशुद्धाक्षरलिखितलेखा न प्रकाशिष्यन्ते।

* नव्यसृष्टलेखेषु व्याकरणछन्दोऽलङ्कारप्रमुखाणां शुद्धिरावश्यिकी।

* ये लेखा निर्णितप्रकाशनदिनात् मासत्रयपूर्वं प्राप्स्यन्ते त एव लेखा प्रकाशिष्यन्ते।

* तदनन्तरं प्राप्तलेखा यदि यथोक्तपूर्वा भविष्यन्ति तर्ह्यागामिन्यङ्के प्रकाशिष्यन्त इति समवधेयम्।

* गद्यपद्य लेखेषु सर्वेषु स्वरव्यञ्जनसन्धिः कर्तव्यैव।

* अर्थभेदस्थान एव ''अवग्रहः'' कर्तव्यः।

* अनुस्वारानुनासिकयोर्विकल्पस्थानेऽनुनासिक एव कर्तव्यः, यत्र नित्यानुस्वार-स्तत्रानुस्वारकरणे न बाधा।

* लेखप्रकाशनेऽप्रकाशने च सम्पादकप्रवराणामेवाधिकारो भविष्यति।

-प्रकाशकः

१. शिखरिणी-रसै-रुद्रैश्छिन्ना य-म-न-स-भ-लागः शिखरिणी, सप्तदशाक्षरीय-अत्यष्टिजातौ शिखरिणीनामसमवृत्तम् रस=६ रुद्र=११ षड्भिः-एकादशाक्षरैर्यतिः। न्यासः-।ऽऽ ऽऽऽ, ।।। ।।ऽ ऽ।। ।ऽ

# शुद्धिः

- *श्रीकमलः

भवतीह जगति समीहा सर्वेषां शुद्धचेतसामिव मनःप्रसन्नता प्राप्त्यै, किन्तु-नोल्लसन्ति ते तद्हेतुविषय-कषायत्यागाय। कुर्वन्ति ते कार्यं प्रसन्नताप्राप्त्यर्थं किन्तु न तेन तेषां प्रसन्नताप्राप्तिर्भवति। यतो न असद्हेतुना साध्यं कदापि साध्यते, सद्हेतुनैव साध्यं साध्यते। यथा तन्तुना घटो न भवति, न च मृदा पटो भवति तद्वत् मनसः संतुष्टि-शुद्धिप्रापणार्थं सांसारिकं विषयजन्यं कषायजन्यं सुखं न समर्थम्। यतो विषयजन्यं सुखं चित्ते कलुषतामापादयति। कषायजन्यं सुखं तु कठोरतां जनयति। वैषयिकसुखेन गृद्धिः प्रभवति। काषायिकं सुखं स्वाभिमानजन्यं यथा "मम ईदृक्-ईदृक् वैभवोऽस्ति, न तादृशोऽन्येषां पार्श्वे, मम परिवारोऽप्येतादृशो नान्येषां, बुद्धि-चातुर्य विचक्षणतादयोऽपि मय्येव नान्येषु, इति।

वैषयिकसुखानुभवे गृद्धिः प्रबलतरा वर्धते। तत्प्रतिबन्धकेषु च क्रोधादिभावः। ततः मनःप्रसन्नताप्राप्त्यर्थं मनः शुद्धिरेव रक्षणीया। विना मनः शुद्धिं प्रसन्नता न भवति कदाऽपि। न च वैषयिकसुखास्वादनावसरे सुखासिका हि मनःप्रसन्नता इति वाच्यम्। यतः सा इत्वरकालिकैव न तु सर्वदा। सा सुखासिका विषयोपभोगावसरेऽपि शनैः शनैः प्रतनूभवति। न तु वर्धते। अपि तु अध्यात्मभावसंबद्धां-मनःशुद्धिं यथा यथा-जीवः प्राप्नोति, तथा-तथा नवं-नवं सुखं स्वात्मजन्यं लभते। न तत्र कोऽपि विरोधः।

शुद्धिः नाम सु-सुष्ठु धीः बुद्धिः मतिः विचारशक्तिः यस्यां सा। यथा न मम इदं सुखावहं हितावहं साम्प्रतं लाभान्वितमप्यनागतकाले दुःखावहम् इति तद्विषया मतिः। सा शुद्धिस्तु त्रिविधाः -

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्ती।

**प्रथमा** सहजा **द्वितीया** तु शास्त्राभ्यासजन्या **तृतीया** तु वैभाविकी। तत्र **प्रथमा**-भवितव्यता-नियोगेन स्वाभाविकी शुद्धा, सरला, जिनाज्ञासमन्विता तथा-विधकर्मक्षयोपशमजन्या विशुद्धिर्भवति। सा तु कदाचिद् जातिस्मृत्याऽपि भवति। **द्वितीया**-आत्मादिपदार्थसभरग्रन्थपठनश्रवणलेखनादितात्त्विकस्वात्महितकृत्सम्यग्-साहित्यसंपर्कजन्या। एते द्वेऽप्यध्यात्मभावजनन्यौ ततः समुपादेयौ, **तृतीया** वैभाविकी विषयकषायसुखाप्तिजन्या। यदि स्वेतरसुखसंततिप्राप्तिर्भवति तदा सा मनोरञ्जिका-सुखासिकाऽन्यदुःखागमनेन सुखसमाप्तिर्भवति। सा तु संसारवर्धनी उन्मार्गपोषिणी दुःखगर्भा कर्मप्रवर्धनहेतुः। आद्ये द्वे स्वीकारणीये तत्प्राप्तौ पुनः पुनः प्रयत्नातिशयः कर्तव्यः। ते एव शाश्वतसुखाय बहुतरसुखाय अनन्यसदृशसुखाय च भविष्यतः। ततः स्वात्मसुखार्थं प्रयतितव्यम्। विषयजन्यं सुखमकिञ्चित्करमस्ति। अपि त्वध्यात्मजन्यसुखं सर्वकल्याणकरं सर्वसमृद्धिकरञ्च इति शम्।

# बहुरत्ना वसुन्धरा

- *मुनिश्री दर्शनरक्षितविजयः

एकदा कर्णावतीपुरीसमीपस्थिताऽडालज ग्रामे केचिज् जैन मुनयो विहृत्यागताः। तदोपाश्रयसमीपवर्तिस्थाने केचन ग्राम्यबाला रन्तुमागताः। एको जैनमुनिस् तान् बालान् दृष्ट्वा कथितवान्। बाला! अत्रागच्छत, अहं युष्मभ्यं कथां कथयामि। अतः कथारसप्रिया बाला उपाश्रयमागत्योपविष्टाः। मुनिना बोधदायिकां कथां कथयित्वा सर्वेभ्यो बालेभ्य एकः प्रश्न पृष्टः। वदत, युष्मभ्यः को बालः शीघ्रं मर्तुमिच्छति, तदा केनाऽप्यङ्गुलिर्नोच्चैः कृता। पश्चाद् द्वितीयः प्रश्नः पृष्टः। युष्मभ्यः को बालश्चिरं जीवितुमिच्छति, तदा सर्वैरप्यङ्गुलिर् उच्चैः कृता। तदा मुनिना कथितं, येषां चिरं जीवितुमिच्छा वर्तते, तैरमी त्रयो नियमाः सम्यक् पालनीयाः।

१) प्रमाणाधिकं न भोक्तव्यम्। २) यत् तद् न भोक्तव्यम् । ३) यदा क्षुधा बाधा स्यात् तदा भोक्तव्यम्।

यावती बुभुक्षा वर्तते, तदूनं किञ्चद् भोक्तव्यं, जैनधर्मे तदूनोदरं तपः कथितम्। सात्त्विकं ग्राम्यं च भोजनं भोजनीयं, विकृतिप्रचुरं च न, यतः सुष्ठु पाचनं न भवेत्। यदा क्षुधा बाधा तदा सकृदेव भोजनीयम्।

इत्येवं जैनमुनिवाचं श्रुत्वा एकविप्रबालकेन सकृद् भोजनस्य नियमो गृहीतः। स नियमः सप्ततिवर्षं यावच्चलितः। नियमस्य विशेषता नास्ति, किंतु द्विद्रव्येणैकाशनं कृतं, सैव महती विशेषता। तस्य महती विशेषता, एकासनतपःप्रभावेन पञ्चाशीतिवर्षेऽपि सर्वेन्द्रियाणि निरोगाणि सन्ति, शिरोबाधा-देहज्वर, च्छद्रिकादिरोगाणां च स्पेशलेशोपि न जातः। एकनवतिवर्षे पूर्णे सति नमस्कारमहामन्त्रध्यानेन पद्मासनमुद्रायां स विप्र इच्छामृत्युं वृत्तवान्। तदैककविना कथितम्।

"पदे पदे निधानानि, योजने रसकूपिका।
भाग्यहीना न पश्यन्ति, बहुरत्ना वसुन्धरा ।।"

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्ती ।

# स सज्जनः

- *मुनिश्री प्रशमरक्षितविजयः

को जगति सज्जनः स्यात् ?

जगद्दृष्ट्या यः सन् पुमान्, स सज्जनः।

के गुणाः सज्जने विद्यन्ते ?

सज्जनानां गुणास्तु सुन्दरतमे श्री सिन्दूरप्रकरनामक ग्रन्थे मुखसौम्यताऽपकृष्टसोमप्रभेण सोमप्रभेणाचार्येण प्रदर्शिताः। तानाह-

**न ब्रूते परदूषणम्**

दूष्यते आत्मा अनेनेति दूषणम्-परदोषास्तु मनोवाक्-कायैस्त्रिभिः प्रकारैः प्रकाशयितुं शक्या भवन्ति, तथापि केवलं वाङ्मार्गेण नात्र प्रकाशनीया इति कथितम्। कथम्? वाङ्मार्गेण प्रकाशको व्यवहारानौचित्येन सज्जनानां सदसि 'दोषदृग्' इति भासते, हास्यास्पदञ्च भवति। नीतिशास्त्रेऽपि प्रोक्तं

**हितं मितं प्रीतं वदेत्**

प्रीतिकरं वाक्यं सर्वस्यापि ग्राह्यत्वात्, तदितरमन्यत्वेन सिद्धम्। अन्यत् परदोषप्रकाशने स्वात्मनो न कोऽपि गुणः स्यात् प्रत्युत सौहार्दं विनश्यति। केनचिदपि भाषितमपेशलं वाक्यमाकर्ण्य स्वस्य मनो दुःखगर्भितं स्यात् तथा परस्यापि तत्सदृशमेव भवति, तज्ज्ञेयम्।

यथा पङ्कः स्वयमेव मालिन्यदोषेण दुष्टोऽस्ति, तत्स्पृष्टः जनोऽपि तथाविधं भावं लभते, तथा निन्दादिभावोऽपि स्वयमेव परदोषप्रकटनेन दुष्टोऽस्ति, तत्स्पृष्टो जनोऽपि तथाविधं भावं लभते। ततः स्वेतरस्मिन् जने स्थितं सूक्ष्ममपि दूषणं, यद् दृष्टिमार्गे सञ्चरितमपि न वदेत्,

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्ती।

## परगुणं वक्त्यल्पमप्यन्वहं

जगति जनाः परगुणप्रशंसां न कुर्वन्तीति न, करोत्येव इत्यर्थः। यत् स्वकार्यमात्रप्रयोजनाद्। सज्जना अपि परगुणप्रशंसां कुर्वन्ति, यत् तद्गतगुणप्रापणत्व-प्रयोजनाद्। सतां प्रकृत्यामेव ह्येतद्, परगुणं तिलमात्रमपि पर्वत स्थूलं विदधति।

परगुणगुणणात् संसारे धनग्रहणादिकार्यमपि प्रयत्नेनाल्पेन भवति। परोत्कर्षात् स्वात्मनोऽपि ह्युत्कर्षता लोके प्रादुर्भवति एव। गुणग्रहणबद्धबुद्धित्वात् पक्षापक्षयो र्विभागस्तु तेषां स्मरणमार्गेऽपि सञ्चरितुं न प्रयतते। सद्भि र्विपक्षस्थो गुणः ''अमेध्येऽपि काञ्चन'' मिति न्यायाद् गृह्यते।

## सञ्जनो भ्रमरवद्

यथा भ्रमर उद्यानारामादिषु वृक्षाणां पुष्परसं पीत्वा स्वात्मसंतोषं वहति तथा सञ्जनाऽपि गुणवञ्जनानां गुणरसं पीत्वा स्वात्मसंतोषं वहति

ततो गुणवत्ताभौतिकसुखप्राप्त्यर्थं परगुणप्रशंसा ह्यनिवार्योपाया ज्ञेया।

- क्रमशः

# श्रीऋषभजिनस्तुत्यष्टकम्

- *मुनिश्रीदिव्यदर्शनविजयः

ऋषभाय नमस्तस्मै विश्वशर्मप्रदायिने,
अनन्तानन्तसौख्याय जितमोहादिशत्रवे ।।१।।
संवेगद्रुपयोदाय, क्रोधकृशानुवारिणे,
रागरोगैकवैद्याय [1]शर्मव्रततिवारिणे ।।२।।
अज्ञानमूढचित्तानां भूतानां मोहवासिनाम्,
भवनाथ! गुणव्रात! दीपिकेव तमोऽपहः ।।३।।
भूषिष्यते कथंकारं नेत्रहीनम् यथामुखम्,
त्वया विना कथंकारं रसासौ भूषयिष्यति ।।४।।
नेहेहं देवं साम्राज्यम् ना याचे स्वर्णमंजूषाम्,
त्वत्प्रासादसुधां यच्छ मनोऽमत्रे भवे भवे ।।५।।
मोहवल्लीकृपाणाय तारकाय भवाम्बुधेः
नमोऽस्तु जितमाराय देहि मे शाश्वतम् सुखम् ।।६।।
शर्म-[2]वञ्जुलमेघाय मनोभूदाहशंभवे[3],
तत्त्व रै[4] राजराजाय[5] गुण वार्धीन्दवे नमः ।।७।।
शरण्यं शरणीकृत्य गमीष्याम्यात्मसोख्यकम्,
ततो देयं दयानाथ! मामनाथं प्रति प्रभो! ।।८।।

---

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्ती ।
१. लता २. वृक्ष ३. शङ्कर ४. धनं ५. धनदः

# चक्षुष्मन्तो भवामः

- *साध्वीजीश्री धन्यरेखाश्रीः

एकदा अकबरभूपतिनाऽऽस्थानजनसमक्षमेकः प्रगल्भमतिपंडितजन- मोहविधायी प्रस्तावो निरुपितः।

तद्यथा-"**मम पार्श्वे चक्षुर्भृद्भ्यः अधिकतरा बृहती अंधजनानां सूचिराने-तव्या।**" एतद् भूपकथनं श्रुत्वा विदग्धजना अपि मतिमोहमापन्नाः प्रणतशिरसः आजन्ममूका इव मौनं स्वीकृतवन्तः। प्रस्तावस्वीकारभीरुणां विद्वज्जनानामपि चित्तक्षोभमाकलयन् नृपति बुद्धिनिधानं बिरबलमन्त्रीश्वरं प्रति स्वदृष्टिं चिक्षेप। राज्ञोऽभिप्रायं ज्ञात्वा मन्त्रिमुख्य आह-हे राजन्। भवत्प्रस्तावनिर्वाहाय मह्यम् दिनद्वयं दातव्यम्। 'तथाऽस्तु' इत्युक्त्वा राज्ञा स्वसम्मति र्दत्ता।

अथ गृहं गत्वा मन्त्रिपतिः 'न किमपि विशिष्टं भूतं' इति सर्वथा निरपेक्षः सन् पूर्णं दिनं व्यतिचक्राम। निशायामपि निश्चिन्तमनाः सुष्वाप। द्वितीयदिने प्रातःकर्म कृत्वापवरकत एकं पुस्तकं गृहीत्वा गृहान्निर्गतः चत्वरमध्य उपविशन् पुस्तकमध्ये किञ्चिल्लिखि-तुमारब्धः।

अथ पथि गच्छता जनेन स पृष्टः-**भो मंत्रीश्वर! प्राकृतजन इव चत्वरमध्य उपविशन् किं करोसि**? एतद्वचनं श्रुत्वा मन्त्रिणा चिन्तितं-**पश्यतोऽपि अयं अन्धः** योऽहं लिखामि' एतद् दृष्ट्वापि पृच्छति। तेन मन्त्रिणा पुस्तकमध्ये अन्धजनसूच्यां तस्य नाम लिखितम्। पश्चाद् बहवः पुरुषा योषितो राजसेवकाश्च समागताः। तैः सर्वैरपि एतदेव प्रश्नः पृष्टः। तच्छ्रुत्वा मन्त्रीश्वरेण ते सर्वेऽपि अन्धजनसूचिमध्ये प्रवेशिताः अन्ततो गत्वा क्रीडायै गतो नृपोऽपि तत्रागतः सन् पृष्टवान्-भो बिरबल! अत्र स्थितः सन् किं करोसि? तच्छ्रुत्वा

* पू.आ.श्री विजयभुवनभानुसूरिसमुदायवर्त्तिनी।

मन्त्रीश्वरेण राजा अपि अन्धजन सूच्यां प्रवेशितः। पश्चात् कार्यं संपन्नमिति कृत्वा चत्वरात् त्वरितं निर्जगाम क्रमशः स्वसदनं प्राप च।

अथ तृतीयदिने प्रभूतजनाकुलायां राजसभायां पुस्तकसमन्वितेन मन्त्रिशिरोमणिना नृपहस्ते पुस्तकमर्पितं। पुस्तकं पठता भूपतिना महत्तरा अन्धजनसूचिर्दृष्टा। तन्मध्ये दृष्टस्वाभिधानोऽकबरः आश्चर्यस्तब्धोऽभूद्। किमेतदसमञ्जसम्? एतत् प्रश्नं श्रुत्वा सप्रहासो बिरबलः प्राह- **''प्रत्यक्षं वस्तु यो न पश्यति स जगत्यन्ध एव।''**

एतदुत्तरं श्रुत्वा सभूपा पर्षदपि परमसन्तोषमापन्ना।

एष कथोपनिषद्-यो नित्यं परमानन्दमयं परमसुखदं अनन्तगुणनिधिमात्मानमव बुध्यापि क्षणभङ्गुरं दुःखविपाकमत्यन्तकष्टदमपि धनकलत्रादिकं वस्तुस्तोमं प्रत्यक्षमेव **दुःखदं पश्यन्नपि रागादिपरवशः सन् तदेवात्यन्तादरेण शाश्वतमिव पश्यति,** धनोपार्जनादिकं दुःखरुपमपि मूढतया सुखरुपमेव मन्यमानः, तदर्थमेव तथा तथा प्रयतते च। रागाद्युपहतचेताः सुखत्वविपर्यासमूढः स स्वस्यान्धतां प्रादुष्करोति। तथा-चोक्तं-इन्द्रिय पराजयशतंके-

'किं तुमंधोऽसि? किं वासि धत्तूरिओ?
अहव किं सन्निवाअेण आउरिओ? ।
अमयसमधम्मं जं विसं व अवमन्नसे,
विसयविसविसमं अमियं व बहु मन्नसे।।७८।।

ननु कामभोगादिप्रतियोगिकं सुखं वयमनुभवामः। तत्कथं प्रत्यक्षं सुखावहं दुःखरुपं मन्ये? सुखरुपमपि दुःखरुपं वदन् त्वमेवान्धतां प्रादुष्कुर्वन्नसीति चेद्, न, वस्तुतत्वं न जानासि। यदाऽऽपातरम्यमपि विषयसुखं परिणामदुखदमेवत्वमाप्यनुभवस्येव-उक्तमेव-इ.प.शतके-

''तिलमित्तं विसयसुहं, दुहं च गिरिरायसिंगतुंगयरं।
भवकोडिहिं न निट्ठइ, जं जाणसु तं करिज्जासु।।-६।।

आशासे यद् वयमेतज्ज्ञात्वा चक्षुष्मन्तो भूत्वा विषयस्वरुपं सम्यग् दृष्ट्वा च विषयगृद्धिं त्यजामः।

# चतुर्विंशतिजिन चैत्यवन्दनानि...

-*साध्वीजीश्री विरागदर्शनाश्रीः

**श्रीसुमतिनाथ जिन चैत्यवंदनम्**

**(वसंततिलका छंदः)**

ऐन्द्रावलीमुकुटघृष्टपदारविंदं,
कान्त्या परास्ततरणिं कलधौतवर्णम् ।
श्रीमङ्गलातनुरुहं प्रणमामि भक्त्या,
राजेन्द्रमेघरथचित्तमयूरमेघम् ।।१।।

यो नौति नाथसुमतिं सुमतिः सुभक्त्या,
सन्नम्यते त्रिजगता सुकृती प्रकामम्।
यः स्तौति देवसुमतिं कुमतिं विहाय,
संस्तूयते सुरनरेन्द्रगणै र्विनम्रैः ।।२।।

दृष्टिस्तु सैव सफला जिन! प्रेक्षते त्वाम्
जिह्वाऽज! सैव पुविताऽदर[1]! या स्तुते त्वाम्।
त्वद्वाग्सुधां पिबति श्रोत्रयुगं वरं तत्,
त्वन्नाम चिन्तयति यद् हृदयं शुभं तत्- ।।३।।

* * *

---

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्तिनी।

१. न विद्यते दरः भयं यस्मात्-अदरः-तत्संबोधनम्-अभयदयाणं इति पदमत्रस्मरणधोरणिमानेतव्यम्।-अमृत

**श्री पद्मप्रभजिनचैत्यवंदनम्**

पद्मास्य! पद्मप्रभ! धर्मद! पद्मनेत्र!,
पद्मप्रभेश! शिवशर्मद! पद्मचिन्ह! ।
पद्माद! नौम्यभयदं तव पादपद्मम्,
पद्माभरक्तनरवराजितपाणिपद्म! ।।१।।

चक्रेण नैव गदया न शरेण नास्त्रैर्-,
भेद्यः कदापि जिन! कर्ममहीधरो यः ।
त्वद्दर्शनेन पविनाऽऽशु हि भिद्यते स
**शक्तिर्हि का मृगपतेः पुरतो मृगस्य** ।।२।।

उक्त्वा ब्रवीमि यदिवाऽल्पमनल्पमेतद्-
त्वद्दर्शनेन जिन! सिध्यति यत्त्वसाध्यम्।
त्वद्दर्शनस्य फलमीश्वर! प्रार्थयेऽदस्-
त्वद्दर्शनं भवतु देव! पुनः पुनर्मे ।।३।।

* * *

**श्री सुपार्श्वजिन चैत्यवंदनम्**

भूपप्रतिष्ठकुलमानसराजहंस!,
इक्ष्वाकुवंशकमलाकरभास्करं त्वाम्।
पृथ्वीमनोमधुपपद्मपरागकल्पम्,
श्रीस्वस्तिकाङ्करमणीय! सदा स्तुवेऽहम् ।।१।।

तीर्थंकराय महते परमेश्वराय,
नेतः! सुपार्श्वविभवे शमिने नमस्ते।
संसारपादपप्रभङ्गप्रभञ्जनाय,
कन्दर्पमत्तगजघातमृगाधिपाय ।।२।।

त्वत्पादपद्ममधुपं परमेश! भूत्वा,

भुक्त्यै न देव! स्पृहयामि न वाऽथ मुक्त्यै।
त्वत्पत्कजं प्रतिभवं शरणं ममाऽस्तु,
याचे प्रभो! तव हि यच्छति किं न सेवा ।।३।।

* * *

**श्री चंद्रप्रभजिन चैत्यवंदनम्**

चन्द्रास्य! भव्यजनचित्तचकोरचन्द्र!
चन्द्रेन्द्रनेत्रवरकैरवपूर्णचन्द्र ! ।
चन्द्राङ्क! चन्द्रप्रभ! त्वं जय देवचन्द्र!
चन्द्रप्रभेश! महसेननृपाब्धिचन्द्र! ।।१।।

दृष्टो मया भवमहोदधितारकस्त्वम्;
सिद्धं ततो जिन! मनोऽखिलवाञ्छितं मे।
दुर्योनि-दुःख-दुरितं दलितं सदा मे,
**चिन्तामणौ सति करे किमसाधनीयम्** ।।२।।

तुभ्यं नमो मदनकैरवभास्कराय,
मोहान्धकारमथनैकविभाकराय।
भव्याङ्गभाग्कमलबोधदिवाकराय,
जैनेन्द्रशासननभोङ्गणभास्कराय ।।३।।

# श्रेयस्करीजिनस्तुतिचतुर्विंशी

- *साध्वीजीश्री प्रशमनिधिश्रीः

**श्री शान्तिजिनस्तुतिः**

**छन्दोनाम** :- षोडशाक्षरीयाऽष्टिजातौ 'पञ्चचामर' नाम समवृत्तम् ।

**वर्णन्यास** :- ।ऽ। ऽ।ऽ ।ऽ। ऽ।ऽ ।ऽ। ऽ

**श्लोकः** :- **मुदा हृदा सदा सुधासमं दधामि तावकं,**
**कुवासनाविनाशनं जिनेश! शासनं शुभम् ।**
**कलाकलापकान्त! मे जगद्गुरो! भवं द्रुतं,**
**निवारयेश ! शान्तिनाथ ! शान्तिकृत् प्रशान्तिभृद्! ।।१६।।**

**अन्वयः** :- जगद् गुरो! कलाकलापकान्त!, जिनेश!, प्रशान्तिभृद्! शान्तिनाथ! शान्तिकृद्!, सदा, कुवासनाविनाशनं, सुधासमं, शुभं, तावकं शासनं, मुदा, हृदा, दधामि, ईश!, मे, भवं, द्रुतं, निवारय।

**विवरणं** :- **मुदा हृदा.......**। हे **जगद् गुरो**!-भुवननाथ!, **कलाकलापकान्त**!-कलानां-विज्ञानानां कलापाः - समुदायास्तैः कान्तः - मनोहरः - यः स तत्संबोधनम् । **जिनेश**! जिनानां - सार्वानां ईशः - नाथः यः स तत्संबोधनम् । **प्रशान्तिभृत्**!-प्रशान्तिं-प्रशमं बिभर्त्ति यः स तत्संबोधने। शान्तिकृत्-शान्ति-निवृत्तिं करोति यः स तत्संबोधने।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिनी ।

शान्तिनाथ!-षोडशमजिन! **कुवासनाविनाशनं**-कुत्सिता-वासना:-कुवासना:-कुविकल्पास्तान् विनाशयति यद् तद्। **सुधासमं**-पीयूषोपमं-अजरामरपददायकत्वात्। **तावकं**-तव। **शुभं**-हितकरं। **शासनं** - प्रवचनं - आज्ञा तं। **सदा** - प्रतिदिनं - नित्यं। **मुदा** - हर्षेण। **हृदा** - हृदयेन। **दधामि** - भावेन स्वीकरोमि। **ईश!** - स्वामिन्!। **मम** - मे। **भवं** - संसारं - भव- भ्रमणं। **द्रुतं** - शीघ्रं। **निवारय** - रुणद्धि।।१६।।

**वृत्तवैशिष्ट्यं :-** अत्र - प्रथमपादे त्रिवर्णनियमकृत: शब्दालङ्कार:। षोडशाक्षरीयाऽष्टि-जातौ "**पञ्चचामर**" नाम समवृत्तम्। तल्लक्षणं तु - हैम-छन्दोऽनुशासने २७८ तमे सूत्रे "ज्र ज्र- जगा: पञ्चचामरं" इति।

* * *

## श्रीकुन्थुजिनस्तुति:

**छन्दोनाम :-** चतुर्दशाक्षरीय-शक्वरीजातौ '**वसन्ततिलका**' नाम समवृत्तम्।

**वर्णन्यास :-** ऽऽ। ऽ।। ।ऽ। ।ऽ। ऽऽ

**श्लोक: :-** **पद्माकर: कमलत: कमलं सुगन्धात्,**
**त्वत्तस् तथैव सुहृदां हृदयानि भान्ति।**
**स्वामिंस्! तत: करुणया हृदये मदीये,**
**वासं सदैव कुरु कुन्थुजिनाधिराज! ।।१७।।**

**अन्वय: :-** हे कुन्थुजिनाधिराज! यथा कमलत: पद्माकर:, सुगन्धात् कमलं, (भाति) तथैव त्वत्त: सुहृदां हृदयानि भान्ति। तत: हे स्वामिन्! करुणया मदीये हृदये सदैव वासं कुरु।

**विवरणं :-** **पद्माकर:**.........। **हे कुन्थजिनाधिराज**! सप्तदशमतीर्थनाथ! **त्वत्त:** - भवत:, **सुहृदां** - सुमनसां, **हृदयानि** - चित्तानि,- भान्ति - विराजन्ते कथं? **तथैव** - तादृग्रीत्या। क: इव ? **पद्माकर:** - तडाग:, सर: इव। कस्मात्? **कमलत:** - सरोजात्। पुन: कमिव? **कमलं** - पङ्कजं इव। कस्मात्? **सुगन्धात्** - सुरभे:। तत: तस्मात्, **स्वामिन्** -

नाथ! । **करुणया** - मयि कृपां कृत्वा । **हृदये** - मानसे । **मदीये** - मत्सत्के । **सदैव** - शश्वद् । **वासं** - प्रतिष्ठानं - स्थानं। **कुरु** - विधेहि। (इति-याचे-प्रार्थयामि) ।।१७।।

**वृत्तवैशिष्टयं :-** अत्र प्रथमपादे क्रिया-दीपकाऽभिधालङ्कार: वृत्त्यनुप्रासालङ्कारश्च। चतुर्दशाक्षरीयशक्वरीजातौ ''**वसन्तलिका**'' नाम समवृत्तम्, तल्लक्षणं तु हैमछन्दोऽनुशासने द्वितीयेऽध्याये २३१ तमे सूत्रे ''त्भौ जौ गौ **वसन्ततिलका**'' इति।

* * *

## श्री अरजिनस्तुतिः

**छन्दोनाम :-** द्वादशाक्षरीयजगतीजातौ '**स्रग्विणी**' नाम समवृत्तम् ।

**वर्णन्यास :-** ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ

**श्लोकः :-** **दर्शनं दर्शनेनेश! मे मोदते,**
**स्पर्शनं नाथ! ते स्पर्शनैः हृष्यति।**
**शासनं प्राप्य चित्तं समाह्लादते,**
**दर्शनं मामरं देहि सौदर्शने! ।।१८।।**

**अन्वयः :-** सौदर्शने!, प्रभो, ते दर्शनेन मे दर्शनं मोदते, ते स्पर्शनैः स्पर्शनं हृष्यति, ते शासनं प्राप्य चित्तं समाह्लादते, ईश! नाथ! मां अरं दर्शनं देहि ।

**विवरणं :-** **दर्शनं........! सौदर्शने!** सुदर्शननृपनन्द! **ईश**! स्वामिन्, **दर्शनं** - नयनं-नेत्रं। **ते** - तव। 'ते' इति पदं सर्वत्र अन्वेति। **मोदते**-प्रसीदति। मम **स्पर्शनं**-देहः, ते- **स्पर्शनैः** - पूजा समये स्पर्शतः, **हृष्यति** - प्रमोदते । मम **चितं** - मानसं - चेत: ते **शासनं** - प्रवचनं **प्राप्य** - लब्ध्वा **समाह्लादते** - तुष्यति । हे **नाथ!, मां** - मह्यं, **अरं** - द्रुतं। **दर्शनं** - सम्यग्दर्शनं-सम्यक्त्वं **देहि**-अर्पय ।।१८।।

**वृत्तवैशिष्टयं :-** अत्र - प्रथमपादे पदगताऽव्यपेतादि - यमकालङ्कार:, द्वितीय -

चतुर्थ-पादयोश्च पदगतव्यपेतयमकालङ्कार:। एतद् द्वादशाक्षरीय-जगतीजातौ '**स्रग्विणी**' नाम समवृत्तम्। तल्लक्षणं तु हैमछन्दोनुशासने द्वितीयेऽध्याये १०१ तमे सूत्रे "**री: स्रग्विणी**" इति।

* * *

## श्री मल्लिनाथस्तुति:

**छन्दोनाम :-** द्वादशाक्षरीयजगतीजातौ '**तामरस**' नाम समवृत्तम् ।

**वर्णन्यास :-** ।।। ।ऽ। ।ऽ। ।ऽऽ

**श्लोक: :-** **विचलितमन्मथतस्करपल्लिं,**
**त्रिभुवनविस्तृतसद्गुणवल्लीं ।**
**शिवकमले तरणिं प्रभुमल्लिं,**
**प्रणमत दुष्कृतघातनभल्लिम् ।।१९।।**

**अन्वय: :-** विचलितमन्मथतस्करपल्लिम्, त्रिभुवनविस्तृतसद्गुणवल्लीं, शिवकमले तरणिं, दुष्कृतघातनभल्लिं, प्रभुमल्लिं प्रणमत ।

**विवरणं :-** **विचलित-मन्मथतस्करपल्लिं**.........। हे भव्या! इति गम्यं। **प्रभुमल्लिं** प्रभुश्चासौ मल्लिश्च प्रभुमल्लिस्तं - प्रभुमल्लिनाथं **प्रणमत** - वन्दत । कीदृशं? **विचलित-मन्मथतस्करपल्लिं** विचलिता - दोलायिता, मन्मथ एव तस्कर:, तस्य पल्लि: येन स तम्। पुन: कीदृशं? **त्रिभुवन-विस्तृत-सद्गुण-वल्लीं**-त्रिभुवने-त्रिजगति विस्तृता-परिसृता सद्गुणा-सम्यग्गुणा एव वल्ली-लता यस्य स तं। पुन: कीदृशं? - **तरणिं** - सूर्यं - सहस्त्ररश्मिं । कस्मिन् ? -**शिवकमले** शिव: - कल्याणं एव कमलं पङ्कजं तस्मिन् । पुन: कीदृशं? **दुष्कृतघातनभल्लिम्** दुष्कृतानां - पापानां -घातनाय - नाशाय भल्लि इव य: स तं ।।१९।।

**वृत्तवैशिष्टयं :-** अत्र - रुपकार्थालङ्कार: अन्त्यानुप्रासश्चालङ्कार:। एतद्-द्वादशाक्षरीयजगतीजातौ "**तामरस**" नाम समवृत्तं तल्लक्षणं तु हैमछन्दोनुशासने द्वितीयेऽध्याये १८३ तमे सूत्रे 'न्ज ज्या **तामरसं**' इति।

**कमलविलासिनीति** अन्ये।

* * *

## श्री मुनिसुव्रतजिनस्तुतिः

**छन्दोनाम :-** सप्तदशाक्षरीयाऽत्यष्टिजातौ **'शिखरिणी'** नामकं समवृत्तम् ।

**वर्णन्यास :-** ।ऽऽ ऽऽऽ ।।। ।।ऽ ऽ।। ।ऽ। **षडेकादशाक्षरैर्यतिः विरामः।**

**श्लोकः :-** **यथा राधा कृष्णं, विमलसरसीं पान्थसमितिः,**
**मयूरः पाथोदं, विकचकमलं षट्पदगणः ।**
**भवानी भूतेशं, कुमुदसुहृदं कैरवव्रजः,**
**स्वरामि त्वां स्वामिन्नहमविरतं सुव्रत! तथा ।।२०।।**

**अन्वयः :-** यथा राधा कृष्णं, पान्थसमितिः विमलसरसीं, मयूरः पाथोदं, षट्पदगणः विकचकमलं, भवानी भूतेशं, कैरवव्रजः कुमुदसुहृदं, तथा अहं सुव्रत! स्वामिन्! त्वां अविरतं स्मरामि।

**विवरणं :-** **यथा राधा.....। स्वामिन्!** हे **सुव्रत!** - मुनिसुव्रतदेव! **अहं त्वां** - **तथा** - **अविरतं** - निरन्तरं **स्मरामि** - अनुध्यायामि । **यथा** - इव । कः - इव? - **कैरवव्रजः** - कुमुदिनी - समूहः इव । कं? - **कुमुदसुहृदं** - चन्द्रं । पुनः का इव? - **भवानी** - गौरी इव । कं? - **भूतेशं** - शंकरं इव। पुनः कः इव। **षट्पदगणः** - भ्रमरव्रज इव । किं ? - **विकचकमलं** विकस्वरपङ्कजं इव। पुनः क इव? - **मयूरः** - शिखीव, कं? - **पाथोदं** - मेघं । पुनः का इव? - **पान्थसमितिः** - अध्वगसङ्घः । कां इव? - **विमलसरसीं** - निर्मल सरोवरं, पुनः का इव? - **राधा** - तन्नामगोपीव । कं? - **कृष्णं**- माधवं।।२०।।

**वृत्तवैशिष्टयं :-** अत्र सादृश्यमूलकक्रियादीपकार्थालङ्कारः। एतद् - सप्तदशाक्षरीया-ऽत्यष्टिजातौ **"शिखरिणी"** नाम समवृत्तम् तल्लक्षणं तु हैम-छन्दोऽनुशासने द्वितीयेऽध्याये - २८६ तमे सूत्रे 'य-म्-न्-स्-भ-ल्-गाः शिखरिणी' इति। षड्भिरेकादशाक्षरैः यतिः-विरामः।

# काव्यशास्त्र विनोदेन

- *साध्वीजीश्री प्रशमनिधिश्रीः

सर्वत्र महिमा कस्य ?, कः कार्यः हितकृज्जने ? ।
श्रियै किं सहकारस्य ?, **ज्ञानस्य प्रत्ययः फलम्** ।।१।।

दरिद्रो न वसेत् कस्मिन् ?, गुणिनः कार्यते च किम् ?।
ध्येयः को मानसे नित्यम् ?, **स्वग्रामे पूज्यते प्रभुः** ।।२।।

माधुर्यं कुत्र कर्तव्यं ?, वक्ति किं वायसो मुहुः ? ।
मुञ्चति नैव का दुःस्थम् ?, **वचने का दरिद्रता** ।।३।।

के लभन्ते तिरस्कारं ?, दुर्गत्यै कानि प्राणिनां ? ।
बहुवचः कृधातोः किम् ? **पापाः पापानि कुर्वते** ।।४।।

किं ज्ञानं प्रधानं स्यादात्मनो लक्षणञ्च किम् ? ।
कस्यै कार्यः प्रयासस्या**त्मज्ञानं विमुक्तये** ।।५।।

सर्वेषां प्रीतिपात्रं कः ?, कीदृगायुर्वपुष्मताम् ?।
लभन्ते सज्जनाः किञ्च ?, **गुणी गच्छति गौरवम्** ।।६।।

**परमः** कश्चतुर्धर्मे ?, को मुक्तिगमनोचितः ?।
कस्यै धर्मो न कर्तव्यः ?, **भावो भव्यो विभूतये** ।।७।।

---

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्तिनी ।

# काव्यशास्त्र विनोदेन

- *सा.श्री धन्यरेखाश्रीः

शूरः प्राप्नोति किं युद्धे ?, मुख्यः को वीरशासने ? ।
को [1]दाति विषयासक्तिं ?, **जयति गौतमो गुरुः** ॥१॥

रक्षन्ति यतिधर्मं के ?, प्रेक्षावन्तश्च कीदृशाः ? ।
कदा त्याज्या रमागृद्धिः ?, **साधवः सुखिनः सदा** ॥२॥

वसन्ति साधवः कुत्र ?, मौनं [2]पिप्रति के नराः ? ।
कीदृशाः शासने जैनाः ?, **नैकत्र मुनयः स्थिराः** ॥३॥

दधाति पतनात् कोऽसौ ? स्वीकर्तव्यं किमापदि ? ।
कदा स्फुरति धर्मश्च ? **धर्मः शरणमापदि** ॥४॥

कियत् प्रेम प्रिये पात्रे ? कुत्र स्युः सूक्ष्मजन्तवः ? ।
कुर्यात् किं भोजनं दाहे ? **अति सर्वत्र वर्जयेद्** ॥५॥

हेत्वस्ति मूर्खतायां किं ? कीदृशं पापकर्मकं ? ।
प्रियस्येष्टः कदा सङ्गः ?, **अज्ञानं कष्टदं सदा** ॥६॥

कारणं किमु सत्कार्ये ?, श्वासे प्राणश्च स्यान्न वा ?।
प्रयाणे कीदृशाः मालाः ?, **गुरुकृपास्ति मङ्गला** ॥७॥

---

* पू.आ.श्री विजयभुवनभानुसूरिसमुदायवर्त्तिनी ।
१. लुनाति २.पालयन्ति

# आज्ञाशद्धा विशद्धा च शिवाय च भवाय च

- *साध्वीजीश्री धन्यपुण्याश्रीः

यियासुर्मोक्षनगरे, चित्तञ्च वैराग्यवासितमप्यस्ति।
लक्ष्यं तदपि न लब्धं, किं हीनोऽस्मि गुरोराज्ञया? ॥१॥

श्रुतमधीतं सुविपुलं, यथोपदिष्टा क्रिया कृता सरसा।
यशोऽप्यर्जितं तपसा, हृतसर्वो गुरोरवज्ञया ॥२॥

एकेन्द्रियादिजीवा, रक्षिता मया चैकाग्रचित्तेन।
ध्याता नाऽऽज्ञाऽवज्ञा च, लक्ष्यप्राप्तिश्च्युता मया ॥३॥

किं तपसा च ध्यानैः, किं भविष्यति रे! विषयत्यागेन।
किं दमेन च नियमेन, कृता चेदाज्ञाविराधना ॥४॥

सुकरो रमणीत्यागो, धनत्यागस्सुकरश्च भावनया ।
सुकरेन्द्रियनिरोधश्च, बहुदुष्करमाज्ञापालनं ॥५॥

स्वल्पपुण्यै र्न किंतु, महापुण्येन प्राप्यते सद्गुरुः।
वञ्च्यते बहुपापेन, न कर्तव्यो योगनिष्फलः ॥६॥

अनंतजन्मभि र्मया, यत्कृताऽज्ञाविराधना बहुतरा।
मिथ्यादुष्कृतं ददे, सुष्ठ्वपुनर्भावभावेन ॥७॥

आज्ञापालने गुरो!, दत्स्व मनोबलं सुदृढं यतः सदा।
भ्रमरीभूय स्थास्यामि, **सौम्ये पुण्ये** प्रशमकमले ॥८॥

* पू.आ.श्री विजयभुवनभानुसूरिसमुदायवर्तिनी।

# ऐन्द्रवृन्दैर्वन्दितः श्रमणधर्मः

- *साध्वीजीश्री कुलरत्नाश्रीः

साधवो धन्या विरलाश्चैव सन्ति। ये सम्यक् पालयन्ति मेरुवद्दुर्धराणि प्राणातिपात-मृषावादा-ऽदत्तादान-मैथुन-परिग्रहत्यागरुपाणि पञ्चमहाव्रतानि षष्ठञ्च रात्रिभोजनविरमणव्रतम्। पुनर्ये बाह्यसंयोगेभ्यः निःसङ्गा विचरन्ति, पञ्चविधाचारान् पालयन्ति, क्षुधापिपासादि द्वाविंशतिपरीषहान् सहन्ते। वशीकृतपञ्चेन्द्रिया मोक्षमेवेहन्ते। कन्दर्पदर्पं दलयित्वा कामिनीः सर्वथा सन्त्यज्य। अधिगतचञ्चलस्वभावस्वर्ण-रुप्यादिन् मुक्त्वा मुक्तिस्त्रियामेव रज्यन्ते। शुद्धचारित्रम् यावज्जीवम् प्रपाल्य ते सकलभवभेदं प्राप्नुवन्ति।

पुनरन्यजीवानपि सम्यक्त्वधर्माराधनायां योजयन्ति स्वयञ्चापि सम्यक् संयममाराध्य सद्गतिं यान्ति। सुचिरं सुखमनुभवन्ति। यथा दन्तं विना चर्वणं, गुरुं विना ज्ञानार्जनं, लवणं विना भोजनं, तथा जिनैः साधुधर्मं विना मनुष्यभवः निष्फलः प्ररूपितः। यथा सूर्यांशवः सकलमन्धकारं प्रणश्य समस्तं जगदुद्योतयन्ति तथा साधवस्तपसा कर्माणि तापयित्वा स्वं पराँश्च दीपयन्ति। श्रमणाः पापमनसो न भवन्ति। स्वजने जने च समास्सन्ति। मानापमानयोरपि समास्सन्ति। शत्रुषु मित्रेषु वा, सर्वेषु च ज़ीवेषु तुल्यमनस्कत्वात् सममतयः सन्ति।

**- श्रमणेषु ईदृशीः उपमाः सङ्घटन्ते-**

१. श्रमणा उरगसमा सन्ति, आहारानास्वादात्, संयमैकदृष्टित्वाच्च।
२. श्रमणा गिरिसदृशाः, परीषहपवनैरकम्प्यमानत्वात्।
३. श्रमणा ज्वलनसदृशाः, तपस्तेजःप्रधानत्वात्।
४. श्रमणाः सागरसदृशाः, गम्भीरत्वात्, स्वमर्यादाऽनतिक्रमात्।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्तिनी ।

५. श्रमणा नभस्तलसदृशाः, सर्वत्र निरालम्बनत्वात्।

६. श्रमणास्तरुगणसदृशाः, स्वकष्टमनादृत्य परोपकारकरणव्यसनित्वात्।

७. श्रमणा भ्रमरसदृशाः, अनियतवृत्तित्वात्।

८. श्रमणा मृगसदृशाः, संसारभयोद्विग्नत्वात्।

९. श्रमणाः पृथ्वीसदृशाः, सर्वंसहगुणधारित्वात्।

१०. श्रमणा जलसदृशाः, कामभोगेऽपि निर्लेपितागुणयुक्तत्वात्।

११. श्रमणा रविसदृशाः, धर्मास्तिकायादिलोकमधिकृत्य विशेषेण प्रकाशकत्वात्।

१२. श्रमणाः पवनसदृशाः, अप्रतिबद्धविहारित्वात्।

क्रोध-मान-माया-लोभविजयिनः श्रमणा भवन्ति। निर्ग्रन्था निष्परिग्रहितां दधाना जीवान् परिबोधयन्तो महीमण्डलं मण्डयन्ति। लौल्यनिर्मुक्तचेतसः साधव आहारं सर्वदोषविवर्जितं असङ्गयोगसिद्ध्यर्थं गृह्णन्ति।

मुनयो विकथास् त्यक्तारः, तत्त्वोपदेशदातारः सन्ति। गतरागादिदोषाः, समिति-गुप्तिधारका मुनयोऽष्टकर्मक्षये नित्यं रताः सन्ति। श्रमणाः दुःखिजने कृपावन्तः सन्ति। ज्ञानश्रद्धया पवित्रीभूय श्रमणा अन्तरङ्गशत्रुवर्गान् दूरीकुर्वन्ति। समस्तविकारविरहिताः श्रमणाः सन्ति। साधवः प्रसन्नतया दुर्जनानां तिरस्कारं सहन्ते, निर्लेपभावेन च सज्जनानां सत्कारं निर्वहन्ते।

स्वाध्यायरतिः, पापविरतिः, आत्मपरिणतिश्च येषां प्रियाः सन्ति, तेषां नामैव निर्ग्रन्थाः।

येषां गीः हित-मित-प्रियास्ति, तेषां नाम वाचंयमाः।

शुभ्रमार्गप्रवर्तकाः, शिवपुर्यामेव दत्तदृष्टयः, भववासपराङ्गमुखाः, श्रेयस्पदमार्गदर्शकाः, भवभ्रमणनाशकाः, प्रशमरसपायकाः, आत्मगुणरक्षकाः, सम्यक्त्वदायकाः, ज्ञानादिसद्गुणधारकाः श्रमणाः सन्ति।

ईदृशानां श्रमणानां दर्शनं भव्यजीवान् श्रेयः प्रापयति।

# स्वामिन्! गतोऽस्मि शरणं चरणं द्वयं ते

- *श्री चन्द्रजैनः

त्वं पालकोऽसि शरणागतमानवानाम्,
त्वं रक्षकोऽसि भवसागरमग्नपुंसाम्।
त्वं बोधकोऽसि शिवमार्गपरायणानाम्,
स्वामिन्! गतोऽस्मि शरणं चरणं द्वयं ते ।।१।।

विज्ञः सदा विकलमानवकष्टवह्निम्,
ज्ञाता सदा सकलजीवनकर्मवृत्तिम्।
जानासि नाथः शुभपावनधर्ममार्गम्,
स्वामिन्! गतोऽस्मि शरणं चरणं द्वयं ते ।।२।।

भक्तिं करोमि भवतो न तु कर्मशान्तिर्,
नित्यं जपामि मनसा तव नाममन्त्रम्।
भक्त्या भजामि सततं, नहि धर्मलाभः,
स्वामिन्! गतोऽस्मि शरणं चरणं द्वयं ते ।।३।।

संसारसागरनिमग्नजनान् सुरक्ष्य,
प्राप्तोऽसि मुक्तिपथसाधक! सिद्धभूमिम्।
हा किं करोमि मदसर्पविषं निपीय,
स्वामिन्! गतोऽस्मि शरणं चरणं द्वयं ते ।।४।।

* डॉ. एस. सी. जानी, १४, क्रीष्णा नगर, रेवारी-१२३ ४०१, हरियाणा.

धर्मप्रदीप! सुखदायक! लोकनाथ!
दीनं सदा हि करुणाकर! मां क्षमस्व।
नत्वा जिनं मदविकारविदारसारं,
स्वामिन्! गतोऽस्मि शरणं चरणं द्वयं ते।।५।।

तुभ्यं नमोऽस्तु भुवनत्रयपालकाय,
तुभ्यं नमोऽस्तु जगदर्त्तिविनाशकाय।
किं किं करोमि निजजीवनरक्षणाय,
स्वामिन्! गतोऽस्मि शरणं चरणं द्वयं ते।।६।।

# जैनदर्शने प्रामाण्यविमर्शः

- ***आचार्यः गोकुलचन्द्रः जैनः**

प्रमाणादिष्टसंसिद्धिरन्यथातिप्रसङ्गतः।

प्रामाण्यं तु स्वतः सिद्धमभ्यासापरतोऽन्यथा।। **[-प्रमाणपरीक्षायां विद्यानन्दः।]**

**-प्रास्ताविकम्-**

शास्त्रीयचिन्तनपरम्परायां जैनमनीषिभिः स्याद्वादनामकः कश्चिद् विचक्षणः सिद्धान्तो गवेषितः। सिद्धान्तोऽयं काचिद् विचारसरणिः। इमां विचारसरणिमनुसृत्य शास्त्रकारैः दर्शनस्य विविधाः सिद्धान्ताः विस्तरेण विमर्शिताः। प्रमाणविचारोऽपि तत्र महत्वमावहति। प्रमाणविचारप्रसङ्गे प्रामाण्यविमर्शः कृतो वर्तते।

ख्रिस्ताब्दस्य प्रथमशतकात् प्रारभ्याष्टादशशताब्दीपर्यन्तं, तैस्तैराचार्यैः सहस्राधिकाः ग्रन्था विरचिताः। तेषां सामान्यसर्वेक्षणमपि न सुकरं, किं पुनः विषयविवेचनम्? एतेषु ग्रन्थेषु यः प्रमाणविचारः कृतो वर्तते तस्य, परिशीलनेन ज्ञायते-यज् जैनदर्शने प्रमाणविमर्शः कालक्रमेण विकासकोटीमाटीकते।

प्राचीनागमपरम्परायां ज्ञानज्ञेयविमर्शः शास्त्रचिन्तायाः प्रधानो विषयः। पश्चात् ज्ञानं प्रमाणमीमांसारूपेण विवेचितम्। आचार्यपादैः **उमास्वाति**महाभागैः **तत्त्वार्थ**सूत्राख्ये ग्रन्थे तत् प्रमाणरूपेण निबद्धम्। ततः परं स्वामि**समन्तभद्रा**दारभ्य **सिद्धसेन दिवाकर-भट्टारकाऽकलङ्कदेव-विद्यानन्द-माणिक्यनन्दि-प्रभाचन्द्र-हेमचन्द्र-यशोविजय** प्रभृतिभिः, तेषु तेषु ग्रन्थेषु प्रमाणविमर्शः कृतः। अयं विमर्शश्चतुष्कोटीमवलम्ब्य कृतः। तद्यथा-१.प्रमाणस्य स्वरूपम्। २. प्रमाणस्य भेदप्रभेदाः। ३. प्रमाणस्य विषयः। तथा ४. प्रमाणस्य फलम्।

* इ-१, रो हाउस शालिमारफार्म्स विपल्याहाना इन्दौर-४५२०१६ (म.प्र.)

**ज्ञानस्य प्रमाणत्वम्-**

यदुक्तं पूर्वं ज्ञानमीमांसैव प्रमाणमीमांसारूपेण विवेचिता, तत् संक्षेपेण तत्त्वार्थसूत्रे चतुर्भिः सूत्रैः प्रतिपादितं वर्तते। तद्यथा- १. मति-श्रुतावधि-मनःपर्ययकेवलानि ज्ञानम्। २. तत्प्रमाणे । ३. आद्ये परोक्षम्। ४. प्रत्यक्षमन्यत्।''-एतेषां पञ्चविधज्ञानानां विस्तरेण विवेचनमस्ति। उत्तरकालीनैराचार्यैः ज्ञानस्यैव प्रमाणत्वं समर्थितं, ततश्च न्यायशास्त्रीय-सरणिमनुसृत्य तस्य विवेचनं कृतम्। तद्यथा-

''तत्त्वज्ञानं प्रमाणं ते युगपत्सर्वभासनम्।''

**इत्याप्तमीमांसायां समन्तभद्राचार्यः।**

''स्वपरावभासकं यथा प्रमाणं भुवि बुद्धिलक्षणम्।''

**इति बृहत्स्वयंभूस्तोत्रे स एव।**

''प्रमाणं स्वपराभासिज्ञानं बाधविवर्जितम्।''

**इति न्यायावतारे सिद्धसेनः।**

''प्रमाणमविसंवादि ज्ञानम्, अनधिगतार्थाधिगमलक्षणत्वात्।''

**इति अष्टशत्यां भट्टाकलङ्कदेवः।**

''तत्स्वार्थव्यवसायात्मज्ञानं मानमिती मतम्।
लक्षणेन गतार्थत्वात् व्यर्थमन्यद् विशेषणम्।।''

**इति तत्त्वार्थश्लोकवार्तिके विद्यानन्दः।**

''स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम्।''

**इति परीक्षा० सूत्रे माणिक्यनन्दिः।**

''सम्यगर्थनिर्णयः प्रमाणम्।''

**प्रमाणमीमांसायां हेमचन्द्रः।**

''सम्यग्ज्ञानं प्रमाणम्।''

**इति न्यायदीपिकायां धर्मभूषणः।-**

एवं जैनप्रमाणशास्त्रे सर्वैराचार्यैः ज्ञानस्यैव प्रमाणत्वं प्रतिपादितम्। किं विशिष्टं ज्ञानं प्रमाणम्, इत्यत्र सम्यक् विशेषणम्। **माणिक्यनन्दि**सूरिणा प्रस्तुतं 'स्वापूर्वार्थ-व्यवसायात्मकं ज्ञानं प्रमाणम्' इति सूत्रं जैनसम्मतं प्रमाणलक्षणं विशेषेण व्यनक्ति।

**सन्निकर्षादीनां समीक्षा -**

जैनदार्शनिकैः सन्निकर्षादीनां प्रमाणत्वं न स्वीकृतम्। पूर्वोक्तसूत्रे प्रयुक्तानि

विशेषणानि, तेषां तेषां मतानां निराकरणं विदधति। तद्यथा-**प्रमेयरत्नमालायाम्**-
"ज्ञानमिति विशेषणमज्ञानरूपस्य सन्निकर्षादेर् **नैयायिका**दिपरिकल्पितस्य प्रमाणत्व-व्यवच्छेदार्थमुक्तम्। तथा ज्ञानस्यापि, स्वसंवेदनेन्द्रिय-मनो-योगिप्रत्यक्षस्य निर्विकल्पकस्य प्रत्यक्षत्वस्य प्रामाण्यं **सौगतैः** परिकल्पितम्, तन्निरासार्थं व्यवसायात्मकग्रहणम्। तथा बहिरर्थापह्नोतॄणां **विज्ञानाद्वैतवादिनां पुरुषाद्वैतवादिनां** पश्यतोहराणां **शून्यैकान्तवादिनाञ्च** विपर्यासव्युदासार्थमर्थग्रहणम्। अस्य चापूर्वविशेषणं गृहीत-ग्राहिधारावाहिकज्ञानस्य प्रमाणतापरिहारार्थमुक्तम्। तथा परोक्षज्ञानवादिनां **मीमांसकानां** स्वसंवेदनवादिनां **साङ्ख्यानां** ज्ञानान्तरप्रत्यक्षवादिनां **योगानाञ्च** मतमपाकर्तुं स्वपदोपादानम्।" एतत् सर्वं **प्रभाचन्द्रेण** स्वकीये **प्रमेयकमलमार्तण्डे** विस्तरेण व्याकृतम्।

### प्रमाणस्य प्रामाण्यम् -

पूर्वोक्तं प्रमाणलक्षणं विवेच्य जैनमनीषिभिः प्रामाण्यविमर्शो विहितः। किमिदं प्रमाणस्य प्रामाण्यं नाम? प्रतिभातविषयाव्यभिचारित्वम्?। अत्र विभिन्नैः दार्शनिकैः विभिन्नानि मतान्युपस्थापितानि। तद्यथा [१] प्रामाण्यं स्वतोऽप्रामाण्यं परतः, इति **मीमांसकाः**। [२] अप्रामाण्यं स्वतः प्रामाण्यं परतः, इति **ताथागताः**। [३] उभयं ततः, इति **सांङ्ख्याः**। [४] उभयमपि परतः, इति **नैयायिक-वैशेषिकाः**। [५] उभयमपि कथञ्चित् स्वतः कथञ्चित् परतः, इति **स्याद्वादिनो जैनाः**।

जैनशास्त्रकारैः मीमांसकानां मतं विशेषरूपेण समीक्षितम्। तत् तु तेषु तेषु शास्त्रेषु द्रष्टव्यम्। अत्र संक्षेपेण तस्य सारः प्रस्तूयते। तद्यथा-प्रमाण्यस्योत्पतिः स्वत एवेति मीमांसकाः प्रतिपादयन्ति। प्रामाण्यस्य स्वतः उत्पत्तिरिति ज्ञानं सामान्यसामग्री-मात्रजन्यत्वमित्यर्थः। येनैव कारणेन ज्ञानं जन्यते तेनैव तत्प्रामाण्यमपि, न तद्भिन्नकारणेनेति भावः। अत्र निगद्यते-'न ते मीमांसकाः, ज्ञानसामान्यसामग्र्याः साम्येऽपि संशयादावपि ज्ञानविशेषे सत्त्वात्। वयं तु ब्रूमहे- ज्ञानसामान्यसामग्र्याः साम्येऽपि संशयादिरप्रमाणं सम्यग्ज्ञानं प्रमाणमिति विभागस्तावदनिबन्धनो न भवति। ततः संशयादौ यथा हेत्वन्तरमप्रामाण्ये दोषादिकमङ्गीक्रियते तथा प्रमाणेऽपि प्रामाण्यनिबन्धनमन्यदेव प्रमेयमभ्युपगन्तव्यम्, अन्यथा प्रमाणाप्रमाणविभागानुपपत्तेः।

एवमप्यप्रामाण्यं परतः प्रामाण्यं तु स्वतः, इति न वक्तव्यम्, विपर्ययेऽपि समानत्वात्। शक्यं हि वक्तुं 'अप्रामाण्यं स्वतः प्रामाण्यं तु परतः, इति। तस्मादप्रामाण्यवत्प्रामाण्यमपि परत एवोत्पद्यते। न हि पटसामान्यसामग्री रक्तपटे हेतुः।

तद्वन्न ज्ञानसामान्यसामग्री प्रमाणज्ञाने हेतुः। भिन्नकार्ययोर्भिन्नकारणप्रभवत्वादवश्यम्भा-वादिति।

**प्रामाण्यं स्वतः परतश्च -**

जैनाभिमतं विवेचयन् **माणिक्यनन्दिः परीक्षामुखे** प्राह - ''तत्प्रामाण्यं स्वतः परतश्च'' इति। अयं विशेषः-तस्य स्वापूर्वार्थलक्षणलक्षितस्य प्रमाणस्य प्रामाण्यमुत्पत्तौ परतः एव। ज्ञप्तौ स्वकार्ये च स्वतः परतश्च, अभ्यासानभ्यासापेक्षया। तथा चोक्तं **धर्मभूषणयतिना**-'कथं तस्य ज्ञप्तिः? अभ्यस्ते विषये स्वतः, अनभ्यस्ते तु परतः। कोऽयमभ्यस्तो विषयः, को वा अनभ्यस्तः? परिचितस्वग्राम-तडागजलादिरभ्यस्तः, तद्व्यतिरिक्तोऽनभ्यस्तः। किमिदं स्वतः, इति? किंनाम परतः, इति। स्वप्रज्ञापकादेव प्रामाण्यज्ञप्तिः स्वतः इति, ततोऽतिरिक्ताज्ज्ञप्तिः परतः, इति।

तत्र तावदभ्यस्ते विमलं जलम् इति ज्ञाने जाते ज्ञानस्वरूपज्ञप्तिसमये एव तद्गतं प्रामाण्यमपि ज्ञायते एव। अन्यथोत्तरक्षणे एव निःशङ्कप्रवृत्तेरयोगात्। अस्ति हि जलज्ञानोत्तरक्षणे एव निःशङ्कप्रवृत्तिः।

अनभ्यस्ते तु विषये जलज्ञाने जाते 'जलज्ञानं मम जातम् इति ज्ञानस्वरूपनिर्णयेऽपि प्रामाण्यनिर्णयोऽन्यतः एव, अन्यथोत्तरकालं सन्देहानुपपत्तेः। अस्ति हि सन्देहो 'जलज्ञानं मम जातं, तत् किं जलमुत मरीचिका', इति। ततः कमलपरिमलशिशिर-मरुत्प्रचारप्रभृतिभिरवधारयति-प्रमाणं प्राक्तनं जलज्ञानं कमलपरिमलाद्यन्यथानुपपत्तेः।

एवं व्यवस्थितमेतत्-प्रामाण्यं उत्पत्तौ परतः एव, ज्ञप्तौ तु कदाचित् स्वतः कदाचित् परतः, इति। तथा चोक्तं **तत्त्वार्थश्लोकवार्तिके**-

''तत्राभ्यासात् प्रमाणत्वं, निश्चितं स्वत एव नः।
अनभ्यासे तु परतः, इत्याहुः केचिदञ्जसा ।।
तच्च स्याद्वादिनामेव, स्वार्थनिश्चयात् स्थितम्।
न तु स्वनिश्चयोन्मुक्तं, निःशेषज्ञानवादिनाम्।।''

स्वयमभ्यस्तविषये प्रमाणस्य स्वतः प्रामाण्यसिद्धेः, सकलविप्रतिपत्तीनामपि प्रतिपत्तुरभावात्, अन्यथा तस्य प्रमेये निःसंशयं प्रवृत्त्ययोगात्। तथा अनभ्यस्तविषये परतः प्रमाणस्य प्रामाण्यनिश्चयात्। तन्निश्चयनिमित्तस्य च प्रमाणान्तरस्याभ्यस्तविषये स्वतः प्रमाणत्वसिद्धेरनवस्थापरस्पराश्रयणयोरनवकाशात्। इत्यलं विस्तरेण।

**सन्दर्भग्रन्थाः -**

१. नंदिसुत्तं, सिरिदेववायगविरइयं । श्री महावीर जैन विद्यालय, बम्बई।

२. पवयणपाहुडसुत्तं, सिरिकुन्दकुन्दविरइयं। परमश्रुतप्रभावकमंडल, अगास।
३. प्रमाणसंग्रहः, भट्टाकलङ्ककृतः। सिंधी जैन ग्रन्थमाला, अहमदाबाद।
४. आप्तमीमांसा, स्वामिसमन्तभद्रविरचिता सनातनजैनग्रन्थमाला, काशी।
५. प्रमाणपरीक्षा, विद्यानन्दकृता। वीरसेवा मन्दिर ट्रस्ट, वाराणसी।
६. परीक्षामुखसूत्रम्, माणिक्यनन्दिविरचितम्। (प्रमेयरत्नमालायां)
७. प्रमेयकमलमार्तण्डः, प्रभाचन्द्रविरचितः। निर्णयसागर प्रेस, बम्बई।
८. प्रमेयरत्नमाला, अनन्तवीर्यविरचिता। चौखम्बा विद्याभवन, वाराणसी।
९. न्यायदीपिका, धर्मभूषणविरचिता। वीरसेवामंदिर, दिल्ली।
९. तत्त्वार्थसूत्रम्, उमास्वामिविरचितम्। श्री गणेशप्रसाद वर्णी ग्रन्थमाला, वाराणसी।
१०. तत्त्वार्थश्लोकवार्तिकम्, विद्यानन्दकृतम्। निर्णयसागर प्रेस, बम्बई।
१२. प्रमाणमीमांसा, हेमचन्द्रविरचिता। सिंघी जैन ग्रन्थमाला, अहमदाबाद।
१३. न्यायावतारः, सिद्धसेनकृतः। सिंघी जैन ग्रन्थमाला, बम्बई।
१४. जैनदर्शने प्रमाणविचारः गोकुलचन्द्रजैनः। 'सागरिका' पृष्ठ ३२३-३२८, सागर।

# *ईश्वरस्य व्यापकता

- *डॉ.आचार्यरामकिशोर मिश्रः

ईश्वर! त्वं परब्रह्म, मन्त्रेषु प्रणवोऽसि हि।
अक्षराणामकारस्त्वं, राजर्षीणां मध्येमनुः ।।१।।

मुनिषु भृगुस्त्वमसि देवर्षिषु च नारदः।
दानवेषु च प्रह्लादः, पशुषु त्वञ्च कामगौः ।।२।।

पक्षिषु त्वं वैनतेयस्त्वमनन्तोऽहिराट्सु च।
स्रोतस्सु त्वं नभोगाङ्गा ब्रह्मण्यानां च त्वं बलिः ।।३।।

क्रतुषु जपयज्ञ स्त्वं, वीरेषु च त्वमर्जुनः।
भक्तानां त्वमुद्धवोऽसि त्वमेव बलिनां बलम् ।।४।।

तेजस्विनाञ्च धाम त्वं त्वमेव पुरुषोत्तमः।
त्वमेवाऽसीह जीवात्मा, परमात्मा त्वमेव हि ।।५।।

सर्ववस्तुषु त्वं वस्तु, न तवानन्ता विभूतयः ।
प्रकृतिपुंसयोरत्र, त्वां विना नास्ति किञ्चन ।।६।।

---

* अत्र लखे "इश्वरव्यापकता यथा" समुल्लिखिता तथा जैनदर्शने न विद्यते तथाप्यत्र विना पक्षपातं साहित्य मेतदिति कृत्वा लेखोऽयं प्रकश्यते। सं.

* डॉ.आचार्यरामिकिशोरमिश्रः २१५/१४ पट्टीरामपुरम्, खेकडा (बागपत) उ.प्र.२५०१०१

१. नो शब्दोऽमरकोषे तृतीयकाण्डेऽव्ययवर्गे प्राप्यते।

त्वं नित्यं शाश्वतं ब्रह्म, त्वं सम्पूर्णं सनातनम् ।
सर्वं त्वमत्र जानासि, वेत्तीह त्वां न कोऽप्यहो!        ।।७।।

त्वमेव जगतो मूलं, सन्तोषश्चत्वमेव प्रभो!
सर्वसत्ता त्वमत्राऽसि, दुःखाऽभावोऽसि त्वं सुखम्        ।।८।।

ब्रह्मात्वमसि विष्णुस्त्वं, महादेवोऽसि शङ्करः ।
इतिव्यापकतेशस्य, त्वं विभुः सर्वव्यापकः        ।।९।।

भारत उत्तर प्रदेश, एलाजनपद-सोरोंवासी,
होतीलाल-कलावत्योः, सुतः शूकरक्षेत्रवासवान् ।
विद्यावाचस्पति[१]-पदधारी **रामकिशोरमिश्र** इह,
काव्यकथोपन्यासरचयिता ईश्वरव्यापकतां कृतवान्        ।।१०।।

१. विद्यावाचस्पतिः =Ph.D.

# प्रा.डॉ. वासुदेव पाठक (वागर्थः) विरचिता "आचार्यहेमेचंद्र" पुस्तिका

- *प्रा.डॉ.मधुसूदन म. व्यासः

देहल्याः साहित्यअकादम्या इ.स.२०१४ मध्ये प्रकाशिता 'आचार्य हेमचंद्र' इति ८४ पृष्ठात्मिका पुस्तिका वर्तते। तस्मिन् चत्वारखंडाः वर्ण्यविषयोपरिन्यस्ताः। तस्मिन् हिन्दीभाषायां हेमचंद्राचार्यस्य परिचयस्य एवमेव प्रदानस्य यस्य सर्वविधम् ज्ञानम् गूर्जरप्रदेशस्य कविना अध्यापकेन डॉ. वासुदेवपाठकेन सुचारुरीत्या प्रदर्शितम्। आचार्यहेमचंद्रस्य महानता-विषयानां सुख्यातश्लोकानां निदर्शनमपि अत्र प्रस्तुतम्, यथा सोमेश्वर रचितः श्लोकः "क्लृप्तम् व्याकरणममौ।

एवमेव-स्वकीय, मेघया हिन्दीभाषायां अस्य आचार्यस्य नैपुण्यम् प्रतिपृष्ठं लक्ष्यते। केषांचन पद्यानां विरचनाः अपि ग्रंथकारेण अत्र कृता। एषा पुस्तिका न केवलानां छात्राणां कृते किंतु विद्वज्जनानां कृतेऽपि पठनयोग्या। यतः अस्याः लेखकः प्रायः चत्वारिंशत् वर्षपर्यन्तम् संस्कृताध्यापनम् महाविद्यालये कृतम्। तदनु अस्याः पुस्तिकायाः लेखनं अकादम्या तैः प्रदत्तम्; वर्षद्वयम् यावत् अध्ययनम् कृत्वा एषा पुस्तिका विरचिता। संदर्भग्रंथानां सूचिः अपि अन्ते प्रदत्ता। एवं जाते संशोधन पुस्तिका एषा इति सुस्थापितम् भवति। अस्याः पठनम् आचार्यहेमचंद्रविषयकम् सर्वम् ज्ञानम् प्रददाति। डॉ.पाठक महोदयेभ्यो अस्याः विरचना या संलक्ष्ये अभिनंदनानि।

---

* -अध्यक्षः संस्कृतविभागः, आर्टस कॉलेज, शामलाजी, जि. अरवल्ली (उ.गुज)




संसारार्तिविभेदनैकप्रवणं,
**निःश्रेयसं** गीयते,
सम्यग्ज्ञानसुरापगा वितनुतां,
**निःश्रेयसं** भास्वरम्।
बुद्धिवैभववारिधिर्विलसति,
**निःश्रेयसेना**द्भुतो,
वर्ण्न्यासससुरम्यकाव्यरचना,
**निःश्रेयसाया**ऽस्तु मे ।।१।।

वाक्शुद्धिं प्रतिभां नवां च लभते,
**निःश्रेयसाद्** वाचकश्,
चत्वारो गुणखण्डका गुणकरा,
**निःश्रेयसस्या**ङ्गणे.
कीर्तिं मुक्तिकरी च सद्गुणकरी,
**निःश्रेयसे** संभवेत्,
सद्भावैः समतादिकैः शुभकृते,
**निःश्रेयस!** स्यात् सदा ।।२।।

**प्रकाशकम्**
**जगद्गुरु पू.आ.श्री**
**विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्**
पालडी-अहमदाबाद

Matiksha
M.: 9820715236